Ref. No.: WSSA /DEC-22 / 04

Dated: 31/12/2022

# सुरधुनी
# Suradhunī

**AN INTERNATIONAL SANSKRIT E-RESEARCH JOURNAL**
**(PEER REVIEWED)**

अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)

ISSN: 2583-4630

**Publisher:** World Sanskritshastra Association (WSSA), Ber Ballavpur, Kotwali, Near Water Tank & Health Centre, Word No.-16, Midnapore, Paschim Medinipur, West Bengal, India, Pin-721101

(http://www.suradhuni.in)

## *CERTIFICATE OF PUBLICATION*

*This is to certify that the research article entitled*
"........................ वैशेषिक-न्यायनये अवयवशब्दार्थविमर्शः ........................"
*authored by Prof./Dr./Mr./Mrs./Ms.* ........ MR. NARUGOPAL DAS ........
*has been published in* SURADHUNĪ – *an International Sanskrit E-Research Journal (Peer Reviewed) in December, 2022, Vol.* ....2......., *Issue* ....1....., *Page No.* ......29... *to* ....53....

## प्रकाशनप्रमाणपत्रम्

प्रमाणीक्रियते यत् प्रो./ड./श्री/श्रीमती/कुमारी ............ नाड़ुगोपालदासः ............
महोदयस्य/महोदयाया: "............ वैशेषिक-न्यायनये अवयवशब्दार्थविमर्शः ............"
इत्यभिधेयं गवेषणापत्रं "सुरधुनी" इति अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता) इत्यस्यां डिसेम्बर, २०२२ मासस्य .........२......... संख्यायाम् .......१......... तमे खण्डे .....२९..... पृष्ठाङ्कात् ....५३.... पृष्ठाङ्कं यावत् प्रकाशितं जातम्।

**Editor / सम्पादकः**
Mr. Rajib Sinha

**Co-Editors / सह-सम्पादकाः**
Dr. Shiladitya Satpathi
Mr. Asit Kumar Sau
Dr. Subhamoy Pahari

**Associate-Editors / सहायोगीसम्पादकाः**
Dr. Palash Biswas
Dr. Shyam Sundar Sharma
Mrs. Sharaddha Upadhey
Dr. Biswajit Mondal

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśah)

# वैशेषिक–न्यायनये अवयवशब्दार्थविमर्शः

**Narugopal Das***

## विषयसंक्षेपः

दुःखनिवृत्तिप्रयोजनमवलम्व्य दर्शनशास्त्रस्य सृष्टिः अभवत्। दर्शनचिन्तनपरम्परायाः कापि सीमा नास्ति। वैदिककालतः दर्शनचिन्तपरम्परा अधुनापि प्रचलति। अस्मिन् शोधपत्रे मया 'वैशेषिक–न्यायनये अवयवशब्दार्थविमर्शः' मया उपस्थाप्यते। आस्तिकदर्शनेषु परार्थानुमानाय अवयवाः स्वीकृताः। 'वैशेषिकन्यायनये अवयवशब्दार्थविमर्शः' नाम शोधपत्ररचनायां विविधानि कारणानि सन्ति। वैशेषिकन्यायदर्शनयोः परार्थानुमाने अवयवाः स्वीकृताः न वा इति मम आदौ मनसि जिज्ञासा आसीत्। यदि अवयवाः स्वीकृताः तर्हि तेषां स्वरूपाणि प्रयोजनानि कानि समानतन्त्रदर्शनेषु वर्णितानि इति जिज्ञासा आसीत्। वैशेषिकन्यायदर्शनयोः अवयवासंख्याविषये न्युनाधिक्यं यदि परिलक्ष्यते तत्कारणं किम् इति जिज्ञासा आसीत्? वैशेषिकन्यायदर्शनयोः अवयवसंख्या यदि भिन्नाः वर्तेन्ते तर्हि कति अवयवाः अवश्यमेव आवश्यकं परार्थानुमानाय कथं वा आवश्यकं इति जिज्ञासा अपि आसीत्। एषा जिज्ञासा दुरीकरणाय अस्मिन् विषये मया शोधपत्रं रचितम्।

*Designation-State Aided College Teacher(catagory-1), Department of Sanskrit, Swarnamoyee Jogendranath Mahavidyalaya, Amdabad, Nandigram, Purba Medinipur.

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśaḥ)

आस्तिकदर्शनेषु अन्यतमम् न्यायदर्शनम्। नैयायिकाः मन्यन्ते अवयवः पञ्चविधः। यथा प्रतिज्ञा हेतुः उदाहरणं उपनयः निगमनञ्चेति। सूत्रकारेण गौतमेन भणितं यत् 'प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः'[15] नैयायिकाः परार्थानुमानार्थं पञ्चावयवानां प्रयोगः कुर्वन्ति। नैयायिकानां अपि भेदः अस्ति– प्राचीनन्यायः नव्यन्यायश्च। अस्मिन् शोधपत्रे प्राचीनन्यायमवलम्व्य अवयवानां संख्या स्वरूपाणि प्रयोजनानि च मया वर्णितानि।

न्यायस्य समानतन्त्ररूपेण वर्तते वैशेषिकदर्शनम्। वैशेषिकदर्शने न्यायमवलम्व्य मतानि परिदृश्यन्ते। परन्तु मतानैक्यमपि परिदृश्यते। अवयवानां संख्यामवलम्व्य मतसाम्यं परिदृश्यते। परन्तु तेषां स्वरुपमवलम्व्य च भेदः सुस्पष्टरुपेण परिदृश्यते। वैशेषिकदर्शने पञ्चावयववाक्यानि स्वीक्रितानि। तानि यथा प्रतिज्ञा अपदेशः निदर्शनम् अनुसन्धानम् प्रत्यम्नायः चेति। प्रशस्तपादेन उक्तम् 'अवयवाः पुनः प्रतिज्ञापदेशनिदर्शनानुसन्धानप्रत्याम्नायाः'[16]अस्मिन् शोधपत्रे वैशेषिकदर्शनमवलम्व्य परार्थानुमाने स्वीकृताः अवयवाः मया आलोचिताः। अन्तिमे निष्कर्षे द्वयोः दर्शनशास्त्रयोः अवयवमवलम्व्य आदौ उत्थितानां प्रश्नानां समाधानः भवति न वा इति मया उल्लिखितम्।

**Keywords-**अवयव, समानतन्त्र, प्रतिज्ञा, अपदेश, निदर्शन, अनुसन्धान, प्रत्यम्नाय, प्रतिज्ञा, हेतु, उदाहरण, उपनय, निगमन

दुःखनिवृत्तिप्रयोजनमवलम्व्य दर्शनशास्त्रस्य सृष्टिः अभवत्। अतः जिज्ञासा जायते दर्शनं किम्? दर्शनशब्दस्य कोऽर्थः? इत्यादयः। दृश्– धातोः उत्तरं ल्युट्– प्रत्ययेन[17] दर्शनशब्दस्य सृष्टिर्भवति। पाणिनिना धातुपाठे दृश्– धातोः अर्थः कृतः 'दृशः प्रेक्षणे।' अर्थात् प्रेक्षणशब्दस्य अर्थः दर्शनम् ज्ञानं अनुधावनं वा। चक्षुरिन्द्रियादिसहायेन वाह्यविषयानां ज्ञानलाभः अत्र न

---

15 न्यायसूत्रम्–१/१/३२ ।

16 प्रशस्तपादभाष्यम्,सम्पादकः. श्रीदूर्गाधरझाशर्मा, पृ.५६५ ।

17 'करणाधिकरणयोश्च', अष्टाध्यायी ३/३/११७।

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśah)

अभिप्रेतः। भारतीयदर्शने दर्शनशब्दस्यार्थः भिन्नः। तत्र दर्शनमित्यस्यार्थः तत्त्वदर्शनम्, आत्मदर्शनम्, आत्मोपलब्धिर्वा। अर्थात् दर्शनेन तत्त्वज्ञानं भवति। तत्त्वं च "सतश्च सद्भावोऽसतश्चासद्भावः"[18] येन तत्त्वपोलब्धिः भवति तत् दर्शनम्– ''दृश्यते साक्षात् क्रियते तत्त्वम् एभिरिति दर्शनानि।'' प्राचीनपण्डिताः उक्तवन्तः–

''यदाभ्युदयिकं चैवं नैश्रेयसिकमेव च।
सुखं साधयितुं मार्गं दर्शयेत् तद् हि दर्शनम्॥''

अर्थात् यत् शास्त्रं अभ्युदयागतसुखं निःश्रेयसलभ्यसुखं च उभययोः पथप्रदर्शकं तत् दर्शनम्। दर्शनशब्दस्य पारिभाषिकार्थः जगतः जीवनस्य च सम्यकोपलब्धिः ज्ञानं वा।

भारतीयदर्शनम् आस्तिकनास्तिकभेदेन द्विविधम्।[19] आस्तिकाः वेदस्य प्रामाण्यं स्वीकुर्वन्ति, नास्तिकाः तु वेदनिन्दकाः[20]इति। आस्तिकश्रेण्याम् अस्ति न्यायः वैशेषिकः सांख्यः योगः मीमांसा वेदान्तश्च। नास्तिकश्रेण्याम् अस्ति चार्वाकः जैनः बौद्धश्च। तेषु भारतीयदर्शनेषु चार्वाकदर्शनमृते सर्वाणि भारतीयदर्शनानि परमपुरुषार्थरूपेण मोक्षं स्वीकुर्वन्ति। मोक्षशब्देन दुःखस्य चिरनिवृत्तिः बोध्यते। मोक्षो हि सर्वेषां जनानां परमपुरुषार्थः। दर्शनशास्त्रं मोक्षलाभस्य उपायं ज्ञापयति इत्यनेन तच्छास्त्रं मोक्षशास्त्रनाम्ना अपि अभिधीयते। अयं मोक्षः तत्त्वज्ञानात् जायते। तत्त्वज्ञानलाभार्थं शास्त्राध्ययनं कर्तव्यम्। तथाहि उक्तम्–

"श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।
मत्वा च सततं ध्येय एते दर्शनहेतवः॥"[21] इति।

---

[18] वात्सायनभाष्य, सम्पादकः– कालिवरवेदान्तवागीशः पृष्ठासंख्या२।

[19] अस्तिनास्तिद्विष्टंमति अनेन सूत्रेण ठक् प्रत्यये आस्तिकं नास्तिकं च इति पदद्वयं सिद्धम् ।

[20] "नास्तिको वेद– निन्दकः" मनुसंहिता २/१।

[21] सांख्यप्रवचनभाष्यम् सम्पादकः– रामानन्दसरस्वती, पृष्ठासंख्या २।

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśah)

तथाहि महर्षिणा कणादेन अपि तदीये वैशेषिकसूत्रग्रन्थे भणितम्–"यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः"[22] इति।

सर्वेषु एव आस्तिकदर्शनेषु अनुमानप्रमाणं स्वीकृतम्। तत्र अनुमानं द्विबिधं यथा स्वार्थानुमानं परार्थानुमानं चेति। केवलं आस्तिकदर्शनेषु परार्थानुमानं न स्वीकृतम्। नास्तिकदर्शनेषु अपि परार्थानुमानं स्वीकृतम्। चार्वाकं विना बौद्धदर्शने जैनदर्शने च अनुमानप्रमाणस्य भेदः परार्थानुमानं स्वीकृतम्। परन्तु मम आलोच्यविषयः अत्र केवलं मीमांसावेदान्तनये स्वीकृतानां अवयवानां विचारः। आस्तिकदर्शनं समानतन्त्रेषु विभक्तम्। तन्त्रशब्दस्यार्थः 'शास्त्रम्'। आस्तिकदर्शनानां मुख्यप्रयोजनं दुःख्यस्य चिरनिवृत्तिः अर्थात् मोक्षः। परन्तु मोक्षस्य उपायः भिन्नः वर्तते। सर्वे आस्तिकदार्शनिकाः मोक्षोपायः प्रदर्शयन्ति। भिन्नोपायेषु येषां दार्शनिकानां मतसाम्यं परिलक्षते ते समानतन्त्रदर्शनं इत्यभिधीयते। यथा १) सांख्यं योगश्च। २) वैशेषिकः न्यायः च। ३)मीमांसा वेदान्तश्चेति।

सर्वेषु दर्शनेषु अवयवशब्दस्य व्यवहारः परिदृश्यते। अवयवः कः? तस्य स्वरूपं किम्? इत्यादयः प्रश्नाः आदौ मनसि जायन्ते। अवयवशब्दः पुंलिङ्गान्तः। अव+√यु+ अप् = अवयव। अवयूयते कार्य्यद्रव्येन संबध्यते इति अवयवः। कार्यशब्देन अत्र अनित्यविषयाः बोध्यन्ते। अवयवः इत्यस्य समार्थकशब्दः अंशः। अवयवानां विमर्शः हि अवयवविमर्शः। विमर्शशब्दस्य समानार्थकः भावना वासना वा। जगतः सर्वे अनित्यविषयाः अंशे विभज्यमानाः। अतः सर्वे विषयाः अवयवेषु विभज्यमानाः। अवयवानां समुदायः अवयवी। अवयवी अवयवेषु वर्तते। जगतः सर्वे अनित्यविषययाः अत्र अवयवी। यथा घटः अवयवी। घटपरमाणु अत्र अवयवः। वैशेषिकाः मन्यन्ते अन्तिमः अवयवः परमाणुः। यतः परमाणोः विभागः नास्ति। अवयवी अवयवेषु विभक्तः। अस्मिन् जगति सर्वे कार्याणि अवयवेषु विभक्तानि। मनुष्यानां मनुष्येतरप्राणीनां उद्भिजानां च शरीरानि अवयवेषु विभक्तानि। मनुष्यानां मनुष्येतरप्राणीनां अवयवाः अङ्गानि इत्यभिधीयन्ते। उद्भिजानां

---

[22] वैशेषिकसूत्रम्– १।

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśah)

अवयवाः पुष्पादयः नामाभिधीयन्ते। अतः सर्वे कार्यद्रव्यानि अवयवेषु विभक्तानि। परन्तु अत्र अवयवशब्देन कार्यद्रव्यानां अवयवाः न बोध्यन्ते। अत्र अवयवशब्देन परार्थानुमानस्य अवयवाः बोध्यन्ते।

समानतन्त्रदर्शनेषु अन्यतमौ वैषेषिकदर्शनं न्यायदर्शनं च। न्यायवैशेषिकतन्त्रं तन्त्रान्तरमिव सूत्रमुखेन यथार्थतया प्रारब्धम्। यद्यपि रामायणमहाभारतपुराणादिकालेऽपि न्यायवैशेषिकतन्त्रस्य चर्चा आसीदिति इतिहासविदो वदन्ति। तथापि अनयोः सूत्रग्रन्थेष्वेव व्यवस्थितं स्वरूपं परिलक्ष्यते। मोक्षोपयोगितादिकस्य पदार्थतत्त्वज्ञानस्य बहुविधस्य सिद्धान्तस्य सामानतया कारणात् कालक्रमेण न्यायवैशेषिकयोः शास्त्रयोः संगमः सञ्जायते। तेन च न्यायवैशेषिकयोः समानततन्त्रता समायाता। अनयोः समानतन्त्रदर्शनयोः अवयवशब्दार्थविमर्षः अत्र मया उपस्थाप्यते।

वैशेषिकनये अवयवशब्दार्थविमर्शः–

आस्तिकदर्शनेषु वैशेषिकदर्शनं अन्यतमम्। महर्षिकणादकृतस्य वैशेषिकसूत्रस्य भाष्यं प्रशस्तपादाचार्येण कृतम्। भाष्यग्रन्थस्य नाम 'प्रशस्तपादभाष्यम्'। वैशेषिकसूत्रं प्रमेयप्रधानग्रन्थः। परन्तु अत्र प्रमाणस्य विषयेऽपि आलोचितः भवति। यतः प्रमाणं विना प्रमेयसिद्धिः न भवति। वैशेषिकनये प्रमाणं द्विविधम्। यथा प्रत्यक्षम् अनुमानञ्चेति। प्रत्यक्षलक्षणात् अनन्तरम् प्रशस्तपादाचार्येण अनुमानलक्षणं कृतम् ''लिङ्गदर्शनात् सञ्जायमानं लैङ्गिकम्''।[23] अत्र 'लिङ्गदर्शनात्' इत्यस्य पदस्य अर्थः लिङ्गस्य अर्थात् हेतोः सम्यक् ज्ञानम्। हेतोः ज्ञानात् उत्पन्नं ज्ञानं लैङ्गिकम् अर्थात् अनुमितिः। लिङ्गम् इति पदेन सद्धेतुः वोध्यते। प्रशस्तपादेन भणितं यत्–

" यदनुमेयेन सम्वद्धम् च तदन्विते।
तदभावे च नास्त्येव तल्लिङ्गमनुमापकम्" ॥[24]

[23] प्रशस्तपादभाष्यम्, सम्पादकः.श्रीदूर्गाधरझाशर्मा, पृ.५७६ ।

[24] प्रशस्तपादभाष्यम्,सम्पादकः.श्रीदूर्गाधरझाशर्मा, पृ.५७८ ।

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśaḥ)

अत्र 'दर्शनम्' इति शब्देन उपलब्धिः बोध्यते। दर्शनम् इति शब्दस्य अर्थः चाक्षुषप्रत्यक्षं न यतः लिङ्गप्रत्यक्षज्ञानेन यथा अनुमितिः भवति तथैव लिङ्गानुमितेन साध्यानुमितिः भवति। पुनः लिङ्गस्य स्मृत्यात्मकज्ञानेन साध्यानुमितिः भवति। उदयनाचार्येण उक्तम् स्मृतिलिङ्गज्ञानेन साध्यानुमितिः भवति। तेन किरणवल्याम् उक्तम्–" दर्शनं ज्ञानं तथा च दृष्टादनुमितात् स्मृताच्च लिङ्गादित्यर्थः।"

'अनुमानम्' इति शब्दः प्रकारद्वयेन निष्पन्नः भवति। अनु–पूर्वकं मा–धातोः उत्तरं 'ल्युट्' इति प्रत्ययेन करणवाच्ये भाववाच्ये च निष्पन्नः भवति "अनुमानम्" इति शब्दः। भाष्यकारेण अत्र भाववाच्ये निष्पन्नः अनुमानम् इति शब्दः गृह्यते। अनुमानम् इति शब्दः अत्र अनुमिति(लैङ्गिकम्) रूपेण बोध्यते। हानादिवुद्धिः अत्र प्रमा। न्यायकन्दलीकारेण श्रीधरभट्टाचार्येण कथ्यते अत्र लक्षणे 'ज्ञानम्' इति पदस्य अध्याहारः आवश्यकः। "लिङ्गस्य दर्शनात् ज्ञानात् सम्यग् जायमानं लैङ्गिकमिति वाक्यार्थः"। अर्थात् लिङ्गदर्शनात् उत्पन्नं सम्यग्– ज्ञानम् अनुमानम्। "सञ्जायमानम्" इत्यत्र 'सम्' इति पदेन संशयः विपर्ययः स्मृतिः च इत्यादिज्ञाने अतिव्याप्तिः निवारिता भवति। वैशेषिकदर्शने अनुमानप्रक्रिया न्यायवत्। व्याप्तिविशिष्टहेतोः दर्शनात् अनन्तरम् अप्रत्यक्षसाध्यस्य अनुमानं भवति। प्रशस्तपादेन उक्तम् अनुमानं द्विविधं दृष्टं सामान्यतोदृष्टं च। "तत्तु द्विविधम् सामान्यतोदृष्टं च"। परन्तु अत्रापि न्यायदर्शनवत् प्रमाणस्य पुनः विभागद्वयम् उपस्थाप्यते। यथा स्वार्थानुमानं परार्थानुमानं च। अनुमितेः करणम् अनुमानम्। कश्चित् जनः व्याप्तिविशिष्टहेतोः दर्शनात् अनन्तरं यदि साध्यस्यानुमानं करोति तर्हि तदनुमानं स्वार्थानुमानम्। अत्र केवलम् अनुमानकर्तुः ज्ञानम् उत्पद्यते। तर्कसंग्रहकारेण उक्तम्–''स्वार्थं स्वानुमितिहेतुः''।[25] यथा धूमं दृष्ट्वा अनुमानकर्तुः वह्नेः ज्ञानम्। तद्भिन्नं परार्थानुमानम्। प्रशस्तपादेन उक्तम्–"पञ्चावयवेन वाक्येन स्वनिश्चितार्थप्रतिपादनं परार्थानुमानम्"। [26]

[25] तर्कसंग्रहः., सम्पादकः. नारायणचन्द्रगोस्वामी, पृ– ५१२।

[26] प्रशस्तपादभाष्यम्., सम्पादकः.श्रीदूर्गाधरझाशर्मा, पृ.५५९–४६०।

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśah)

अभीष्टार्थस्य प्रतीतिः येभ्यः शब्दसमुहेभ्यः भवति तेषाम् पञ्चखण्डाः सन्ति। वाक्यान्तर्गताः पञ्च खण्डाः वाक्यसमूहापेक्ष्य अवयवः इति मन्यन्ते। यतः वाक्यसमूहः अत्र अवयवी इति मन्यते। "स्वयं साध्यानन्तरीयकत्वेन निश्चितोऽर्थः स्वनिश्चितार्थः"। 'अर्थः' इति शब्दस्य अर्थः अत्र हेतुः लिङ्गं वा। हेतुना अनुमेयं साध्यं प्रतिपादितः भवति अतः अत्र 'अर्थः' शब्दस्य अर्थः हेतुः लिङ्गं वा। अनेन अर्थेन वक्ता हेतोः साध्यव्याप्यत्वम् अर्थात् स्वज्ञातस्य अर्थस्य प्रतिपादनं करोति। अत्र परसन्देहं दूरीकर्तुं पञ्चावयववाक्यस्य प्रतिपादनं हि परार्थानुमानम्। "पञ्चावयवेन वाक्येन" इत्यत्र "इत्थम्भुतलक्षणे तृतीया" इत्यनेन तृतीया भवति। अनेन ज्ञायते पञ्चावयववाक्येन परार्थानुमानं न भवति। पञ्चावयववाक्यानि परार्थानुमानस्वरूपम्। कीरणावलीकारेण भिन्नरूपेण उक्तम् "अथवा सुनिश्चितस्यानुमेयसा प्रतिपादनं प्रतिपत्तिः येन लिङ्गप्रतिपादनावान्तरव्यापारवता पञ्चावयवेन वाक्येन स्मृतिसमारूढेन परार्थं भवति तत् तथाभूतम् वाक्यम् परार्थानुमानम् इति।" वैशेषिकाः पञ्चावयववाक्यानि स्वीकुर्वन्ति। तानि यथा प्रतिज्ञा अपदेशः निदर्शनम् अनुसन्धानम् प्रत्यम्नायः श्चेति। प्रशस्तपादेन उक्तम् "अवयवाः पुनः प्रतिज्ञापदेशनिदर्शनानुसन्धानप्रत्याम्नायाः।" [27]इति।

**प्रतिज्ञा–**

अवयवेषु आदौ अस्ति प्रतिज्ञा। प्रशस्तपादस्य अभिमतम् "तत्रानुमेयोद्दे शोऽविरोधी प्रतिज्ञा।[28] अर्थात् अनुमितौ अभिप्रेतविषयः साध्यः वा अनुमेयः। अनुमितौ साध्यस्य अर्थात् अनुमेयस्य प्रतिपादकवाक्यं प्रतिज्ञा। साध्यः सर्वदा पक्षे प्रतिपादितः भवति। अत्र साध्यः धर्मः तथा धर्मी अत्र पक्षः। अर्थात् पक्षे सः धर्मः विद्यते। पुन वक्तुं शक्यते साध्यविशिष्टपक्षबोधकवाक्यं हि प्रतिज्ञावयवः। प्रतिज्ञावाक्यं सर्वदा साध्यस्य अविरोधीवाक्यं भवति। अनेन कारणेन प्रत्यक्षविरोधि अनुमानविरोधि वेदविरोधि च वाक्यं कदापि प्रतिज्ञावयववाक्यं न भवति। न्यायकन्दलीकारेण भणितं यत् "विशिष्टो धर्मी अनुमेयः पक्ष इति कथ्यते। तस्य यदुद्देशमात्रं

[27] प्रशस्तपादभाष्यम्, सम्पादकः.श्रीदूर्गाधरझाशर्मा,पृ.५६५ ।

[28] प्रशस्तपादभाष्यम्, सम्पादकः.श्रीदूर्गाधरझाशर्मा, पृष्ठासंख्या–५६६ ।

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśah)

सङ्कीर्तनमात्रं साधनरहितं सा प्रतिज्ञेति।"[29] अर्थात् अनुमेयस्य प्रतिपादकवाक्यं प्रतिज्ञा। अत्र कोऽपि हेतुः न विद्यते।

प्रतिज्ञावाक्यस्योदाहरणं "द्रव्यं वायुरिति"। लक्षणे "अविरोधी" इति पदस्य ग्रहणेन अत्र बोध्यते प्रत्यक्षविरुद्धवाक्यम् अनुमानविरुद्धवाक्यं वेदविरुद्धवाक्यं स्वाभिप्रेतशास्त्रविरुद्धवाक्यं स्ववचनविरोधिवाक्यं च प्रतिज्ञा न भवति। यथा प्रत्यक्षविरुद्धवाक्यं "अग्निरनुष्णः" प्रतिज्ञा न। प्रत्यक्षप्रमाणेन अत्र वोध्यते अग्निः उष्णः। अतः परार्थानुमितौ अदौ प्रतिज्ञावाक्यम् आवश्यकमिति वैशेषिकानां अभिमतम्।

**अपदेशः–**

अत्र द्वितीयावयवः अपदेशः। लिङ्गवचनम् अर्थात् हेतुबोधकवाक्यम् अपदेशः। प्रशस्तपादेन उक्तम् "लिङ्गवचनमपदेशः।"[30]परन्तु अत्र प्रश्नः आगच्छति लिङ्गं किम्? प्रशस्तपादेन अत्र उक्तम् अनुमेयपक्षे साध्येन सह यत् तिष्ठति तत् यदि साध्यस्य स्वजातीयदृष्टान्ते तिष्ठति, तत् यदि साध्यस्य विजातीयदृष्टान्ते न तिष्ठति तत् लिङ्गं हेतुः वा। हेतुः पक्षे सर्वदा साध्येन सह तिष्ठति। अत्र हेतुशब्देन सत् हेतुः बोध्यते। साध्याभावाधिकरणे यदि कुत्रापि हेतुः परिलक्ष्यते तर्हि स हेतुः दुष्टहेतुः हेत्वाभासः वा। लिङ्गस्य अर्थात् सत् हेतोः कथनं येन वाक्यसहायेन भवति सः अपदेशः।

अत्र प्रतिज्ञा आसीत् "द्रव्यं वायुः"। अपदेशवाक्यम् अत्र भवति "क्रियावत्वात् गुणवत्वात् चेति"। अत्र क्रियावत्वात् गुणवत्वात् च हेतुद्वयं वायौ अस्ति। गुणवत्वहेतुः सर्वेषु द्रव्येषु अस्ति। क्रियावत्वहेतुः मूर्तद्रव्येषु अस्ति। परन्तु हेतुद्वयं अद्रव्ये नास्ति। अत्र साध्यं वायुः। तस्य स्वजातीयदृष्टान्तः आकाशादिद्रव्याणि। तत्र गुणः अस्ति। पृथिव्यादिमूर्तद्रव्येषु क्रिया अस्ति। अतः वायोः स्वजातीयदृष्टान्तेषु क्रिया गुणः च स्तः। क्रिया गुणः च अत्र लिङ्गम्। अस्य लिङ्गद्वयस्य कथनम् अपदेशवाक्यसहायेन अत्र भवति। इति वैशेषिकानाम् आभिमतम्।

---

[29] प्रशस्तपादभाष्यम्, सम्पादकः.श्रीदूर्गाधरझाशर्मा, पृष्ठासंख्या–५६६ ।

[30] प्रशस्तपादभाष्यम्, सम्पादकः.श्रीदूर्गाधरझाशर्मा, पृष्ठासंख्या–५७५ ।

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśah)

**निदर्शनम्–**

तृतीयावयववाक्यं निदर्शनम्। निर्दिश्यते निश्चिता साध्यसाधनयोर्व्याप्तिरस्मिन्निति निदर्शनम् इति व्युत्पत्त्यनुसारेण निदर्शनशब्दस्य पर्यायवाची शब्दः दृष्टान्तः। निदर्शनं द्विविधं साधर्म्यनिदर्शनं वैधर्म्यनिदर्शनं च। प्रशस्तपादेन साधर्म्यनिदर्शनविषये उक्तम् "तत्रानुमेयसामान्येन लिङ्गसामान्यस्यानुविधानदर्शनं साधर्म्यनिदर्शनम्।"[31] अर्थात् हेतुसाध्ययोः सहावस्थानं येन वाक्येन निर्दिश्यते तत् साधर्म्यनिदर्शनम्। यथा "यत् क्रियावत् तत् द्रव्यं दृष्टं यथा शर इति"। अत्र साध्यः द्रव्यम् तथा हेतुः "क्रियावत्वम्"। द्वयोः सहावस्थानं 'शरे' इत्यत्र प्राप्यते। अतः 'शर' इत्यत्र साधर्म्यनिदर्शनम्।

प्रशस्तपादेन वैधर्म्यनिदर्शनविषये उक्तम् "अनुमेयविपर्यये च लिङ्गस्याभावदर्शनं वैधर्म्यनिदर्शनम्।"[32] अर्थात् अनुमेयः साध्यस्याभावे लिङ्गस्याभावः येन वाक्येन निर्दिश्यते तत् वैधर्म्यनिदर्शनम्। यथा "यत् अद्रव्यं तत् क्रियावत् न भवति यथा सत्तेति"। अत्र साध्यस्याभावः अद्रव्यम् अर्थात् द्रव्यभिन्नं जात्यादि वोध्यते। अक्रियावत्वम् अत्र हेत्वभावः। साध्यस्य अभावे हेतोः अभावस्थानं सत्ता। अतः 'सत्ता' अत्र वैधर्म्यनिदर्शनम्। न्यायकन्दलीकारेण श्रीधरभट्टेन अत्र उक्तम्– "साध्यसाधनयोरनुगमो निदर्श्यते येन वचनेन तद्वचनं साधर्म्यनिदर्शनम्, साध्यव्यावृत्त्या साधनव्यावृत्तिर्येन वचनेन निदर्श्यते तद्वैधर्म्यनिदर्शनमिति भेदः"।[33]

प्रकृतरूपेण निदर्शनं न भुत्वा यदि निदर्शनरूपेण स्यात् तर्हि स निदर्शनाभासः। निदर्शनाभासः अपि द्विविधः साधर्म्यनिदर्शनभासः वैधर्म्यनिदर्शनाभासश्चेति।

---

31 प्रशस्तपादभाष्यम्, सम्पादकः.श्रीदूर्गाधरझाशर्मा, पृष्ठासंख्या–५९९ ।

32 प्रशस्तपादभाष्यम्, सम्पादकः.श्रीदूर्गाधरझाशर्मा, पृष्ठासंख्या–५९८ ।

33 प्रशस्तपादभाष्यम्, सम्पादकः. श्रीदूर्गाधरझाशर्मा, पृष्ठासंख्या– ५९८।

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśah)

**अनुसन्धानम्–**

चतुर्थावयवः अनुसन्धानम्। प्रशस्तपादेन उक्तम् "निदर्शनेऽनुमेयसामान्येन सह दृष्टस्य लिङ्गसामान्यमनुमेयेऽन्वानयनमनुसन्धानम्"।[34] साध्येन सह व्याप्तिविशिष्टस्य लिङ्गस्य ज्ञानात् परं तस्य लिङ्गसामान्यस्य पक्षे अवस्थितिज्ञापकवाक्यम् अनुसन्धानम्। अनुशब्दस्य अर्थः पश्चात् तथा सन्धानशब्दस्य अर्थः ज्ञानम्। अपदेशावयवे पक्षस्य धर्मरूपेण लिङ्गस्य अवस्थितिज्ञापनं भवति। परन्तु व्याप्तिविशिष्टस्य लिङ्गस्य अवस्थितिज्ञापनं न भवति। यतः पक्षधर्मरूपेण लिङ्गज्ञानात् अनन्तरं व्याप्तिविशिष्टलिङ्गस्य पक्षे अवस्थितिज्ञापनं भवति अतः अवयवोऽयम् अनुसन्धानम्। अनुसन्धानस्य ज्ञानं विना पक्षे साध्यसाधनम् असम्भवम्। अपदेशावयवे पक्षे केवलं लिङ्गस्य अवस्थितिज्ञापनं भवति। निदर्शनावयवे साध्यसामान्येन सह लिङ्गसामान्यस्य व्याप्तिसम्वन्धज्ञापनं भवति। अनुसन्धानावयवे व्याप्तिविशिष्टलिङ्गस्य पक्षे अवस्थितिज्ञापनं भवति।

निदर्शनवत् अनुसन्धानमपि द्विविधम् साधर्म्यानुसन्धानं वैधर्म्यानुसन्धानञ्च। साधर्म्यानुसन्धानस्य उदाहरणं यथा "तथा च वायुः क्रियावान् इति"। वैधर्म्यानुसन्धानस्य उदाहरणं यथा "न च तथा वायुः निष्क्रियः"। इति वैशेषिकानां अभिमतम्।

**प्रत्यम्नायः–**

अन्तिमावयवः प्रत्यम्नायः। प्रति–आ–म्ना–धातोः करणवाच्ये 'घञ्'–प्रत्ययेन प्रत्यम्नायशब्दस्य सृष्टिर्भवति। अत्र पदद्वयं विद्यते प्रति आम्नायः च। आम्नायशब्दस्यार्थः प्रतिज्ञा। अर्थात् प्रत्यम्नायशब्दस्यार्थः प्रतिज्ञायाः पुनर्वचनम्। वक्ता येन वाक्येन सन्धिग्धजनं निकषा सुनिश्चितपक्षे साध्यस्य प्रतिपादनं करोति तत् प्रत्यम्नायः। प्रशस्तपादेन उक्तम् "अनुमेयत्वेनोद्दिष्टे चानिश्चिते च परेषां निश्चयापादनार्थं प्रतिज्ञायाः पुनर्वचनं प्रत्यम्नायः"।[35] अत्र प्रतिज्ञाकृतवाक्यस्य पुनः प्रतिपादनं भवति। प्रतिज्ञावयवे पक्षे साध्यस्यावस्थितिः प्रतिपादिता भवति परन्तु स साध्यः

---

[34] प्रशस्तपादभाष्यम्, सम्पादकः.श्रीदूर्गाधरझाशर्मा, पृष्ठासंख्या–६०६।

[35] प्रशस्तपादभाष्यम्, सम्पादकः.श्रीदूर्गाधरझाशर्मा, पृष्ठासंख्या–६०६।

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśah)

समर्थहेतुना प्रतिपादितः न। अतः प्रतिज्ञावाक्येन निश्चितरुपेण साध्यज्ञानं न भवति। सन्धिग्धजनस्य सन्देहनिरशनं वा यथार्थज्ञानं न भवति। अतः प्रत्यम्नायवाक्यम् आवश्यकम्। अत्र सन्धिग्धजनस्य सन्देहनिरसनम् अर्थात् यथार्थज्ञानं भवति। प्रत्यम्नायवाक्येन समर्थहेतुना पुनः निश्चितरूपेण साध्यज्ञापनं भवति। अनेन कारणेन प्रतिज्ञायाः पुनर्वचनं प्रत्यम्नायः। प्रत्यम्नायवाक्यस्य उदाहरणं यथा "तस्मात् वायुः द्रव्यमिति"।

अनेन पञ्चावयववाक्येन वायोः द्रव्यत्वसिद्धिः भवति। अतः पञ्चावयवेन वाक्येन परेषां स्वनिश्चितार्थप्रतिपादनं भवति। अनेन रूपेण सिद्धिर्भवति पञ्चावयववाक्यानि परार्थानुमानम्। इति वैशेषिकानाम् अभिमतम्।

**न्यायनये अवयवशब्दार्थविमर्शः–**

आस्तिकदर्शनेषु न्यायदर्शनं अन्यतमम्। नीयते प्राप्यते विवक्षितार्थः सिद्धिः अनेन इति न्यायः। नी–धातोः इण्–प्रत्ययेन न्यायशब्दस्य व्युत्पत्तिः भवति। व्युत्पत्त्यानुसारेण न्यायः इति शब्दस्यार्थः प्रमाणम्। अनेन ज्ञायते न्यायदर्शनं प्रमाणप्रधानशास्त्रम् इति। अस्य दर्शनस्य प्राचीनग्रन्थः 'न्यायसूत्रम्'। महर्षिवात्सायनेन न्यायसूत्रस्योपरि न्यायभाष्यं रचितम्। तत्परं न्यायदर्शनस्य वहवः ग्रन्थाः अधुना प्राप्यते। भारतीयदार्शनिकाः सर्वदा जिज्ञासु आसन्। अतः ते सर्वदा ज्ञानलाभार्थं नियुक्ता अभवन्। अत्र 'ज्ञानम्' इति शब्देन परमज्ञानमेव बोध्यते। न्यायनये अस्य ज्ञानस्य विषयः आत्मादि प्रमेयम्। यथार्थज्ञानलाभं प्रमाणस्योपरि प्रतिष्ठितम्। सांख्यकारिकायाम् उक्तम् ''प्रमेयसिद्धिः प्रमाणाद्धि''।[36] प्रमाकरणं प्रमाणम्। परमज्ञानलाभेन ऐकान्तिकात्यन्तिकदुःखनिवृत्तिः भवति। स एव मोक्षः। वात्सायनेन उक्तम् ''आत्मादे खलु प्रमेयस्य तत्त्वज्ञानान्निश्रेयसाधिगमः''।[37] अतः प्रमाणमावश्यकम्। प्रमायाः करणं प्रमाणम्। यथार्थज्ञानलाभाय प्रमाणमावश्यकम्। न्यायदर्शने प्रमाणं चतुर्विधम्। यथा प्रत्यक्षम् अनुमानम्

[36] सांख्यकारिका –४

[37] न्यायसूत्रम्–१/१/१

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśah)

उपमानं शब्दश्चेति। आचार्यगौतमेन भणितं यत् ''प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि''।[38] प्रत्यक्षप्रमाणात् परं न्यायसूत्रकारेण गौतमेन अनुमानलक्षणम् कृतम् ''अथ तत् पूर्व्वकं त्रिविधमनुमानं पूर्ववच्छेषवत् सामान्यतोदृष्टञ्च''।[39] अत्र 'तत् पूर्व्वकम्' इति पदेन अनुमानलक्षणं क्रियते। न्यायभाष्ये वात्स्यायनेन भणितं यत् ''तत्पूर्व्वकम् इत्यनेन लिङ्गलिङ्गिनोःसम्बन्धदर्शनं लिङ्गदर्शनं च अभिसम्बध्यते। लिङ्गलिङ्गिनोः सम्वद्धद्वयो–र्द्दर्शनेन लिङ्गस्मृतिरभिसम्बध्यते। स्मृत्या लिङ्गदर्शनेन चाप्रत्यक्ष अर्थ अनुमीयते"।[40] अत्र 'तत्' इति शब्देन प्रत्यक्षज्ञानं बोध्यते। अतः 'तत् पूर्व्वकम्' इत्यनेन प्रत्यक्षपूर्व्वकं बोध्यते। प्रत्यक्षपूर्वकं ज्ञानम् अनुमानम्। अत्र प्रत्यक्षम् इति पदेन महर्षिः हेतुप्रत्यक्षं बोधयति। परन्तु अत्र प्रश्नः आगच्छति कस्य हेतोः? उक्तम् व्याप्तिविशिष्टहेतोः। व्याप्तिशब्देन हेतुसाध्ययोः (लिङ्गलिङ्गिनोः) सम्बन्धः बोध्यते। यत्र यत्र हेतुः तत्र तत्र साध्यः, यत्र यत्र साध्याभावः तत्र तत्र हेत्वाभावः यदि परिदृश्यते तर्हि हेतुसाध्ययोः व्याप्तिः स्वीक्रियते। यथा वह्निधूमयोः व्याप्तिसम्वन्धः अस्ति। अत्र हेतुः धूमः । साध्यः वह्निः । धूमदर्शनेन व्याप्तेः स्मरणं भवति। तत्परं अप्रत्यक्षवह्नेः ज्ञानं भवति। अतः हेतुप्रत्यक्षात् अनन्तरं व्याप्तेः स्मरणं भवति। तत्परम् अप्रत्यक्ष– साध्यस्यानुमानं भवति। अत्र अनुमानेन यथार्थज्ञानं भवति। अन्नंभट्टेन भणितं यत् ''लिङ्गपरामर्श अनुमानम्''।[41]

तत्त्वचिन्तामणिकारेण गङ्गेशोपाध्यायेन प्रमाणलक्षणप्रसङ्गेन उक्तम् लिङ्गपरामर्शः अनुमितेः करणम् अर्थात् अनुमानम्। परन्तु 'परामर्श' इति ग्रन्थे तेन उक्तम् लिङ्गपरामर्शस्य जनकरूपेण व्याप्तिज्ञानम् अनुमितेः चरमकारणम् अर्थात् अनुमानम्। प्राचीनन्यायाचार्येण उद्द्योतकरेण उक्तम् अनुमितेः चरमकारणं लिङ्गपरामर्श एव अनुमितेः करणम् अर्थात् अनुमानम्। प्रमाणस्य चरमफलं

38 न्यायसूत्रम् –१/१/३

39 न्यायसूत्रम् –१/१/५

40 न्यायसूत्रम् –१/१/५

41 तर्कसंग्रहः, सम्पादकः.नारायणचन्द्र गोस्वामी, पृष्ठासंख्या–३९५ ।

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśah)

'हानबुद्धिः','उपादानबुद्धिः','उपेक्षाबुद्धिः' चेति। प्रमाणजन्यं प्रमितिरपि प्रमाणं भवति।अतः हानदिवुद्धिः प्रमितेः करणम्। अतः अनुमितिरपि अनुमानप्रमाणम् इति नाम्नाभिधीयते। न्यायसूत्रकारेण अनुमानस्य भेदत्रयम् उल्लिखितम्। यथा–१) पूर्ववत् अनुमानम् २) शेषवत् अनुमानम्। ३) सामान्यतोदृष्टः अनुमानम्।

न्यायदर्शने स्वीकृतषोडशपदार्थेषु अन्यतमः पदार्थः अवयवः। अवयवस्य वर्णनाप्रसङ्गे सूत्रकारः पुनः अनुमानस्य विभागम् उत्थापयति। अनुमानं द्विविधम्– स्वार्थानुमानं परार्थानुमानं च। तत्त्वचिन्तामणिकारः गङ्गेशोपाध्यायः अवयवग्रन्थस्य आदौ उक्तम् ''तच्चानुमानं परार्थं न्यायसाध्यमिति न्यायस्तदवयवाश्च प्रतिज्ञाहेतुदाहरनोपनय–निगमनानि निरुप्यन्ते।" भाससर्वज्ञमपि 'न्यायसार' इति ग्रन्थे उक्तम्–''तत् पुनः द्विविधंस्वार्थं परार्थञ्चेति। परोपदेशानपेक्षं स्वार्थम्, परोपदेशापेक्षं परार्थमिति। परोपदेशास्तु पञ्चावयववाक्यम्''। अनुमितेः करणम् अनुमानम्। कश्चित् जनः स्वार्थं व्याप्तिविशिष्टहेतोः दर्शनात् अनन्तरं यदि साध्यस्यानुमानं करोति तर्हि तदनुमानं स्वार्थानुमनम्। अत्र केवलम् अनुमानकर्तुः ज्ञानम् उत्पद्यते।तर्कसंग्रहकारेण उक्तम् ''स्वार्थं स्वानुमितिहेतुः''।[42] यथा धूमं दृष्ट्वा वह्नेः ज्ञानम्।

स्वार्थानुमितिविषयं यदि कश्चित् जनः अपरस्य ज्ञातार्थं वाक्यस्य प्रयोगं करोति तर्हि तत् अनुमानं परार्थानुमानम्। अत्र वाक्यशब्देन अवयववाक्यं बोधयति। वयं सर्वे अपरं किमपि विषयज्ञातार्थं वाक्यस्य प्रयोगं कुर्वन्ति। परार्थानुमाने व्यवहृतवाक्यम् अवयवः इति नाम्ना अभिधीयते। अवयवः इति नाम्नः कारणं विद्यते। परार्थानुमाने व्यवहृता वाक्यसमष्टिः 'न्याय' नाम्नाभिधीयते। वात्सायनेन अपि उक्तम् ''सोऽयं परमन्यायः''। तथाहि अन्यत्र उच्यते "उचितानुपूर्वीकप्रतिज्ञादिपञ्चसमुदायत्वं न्यायत्वम्"[43] अवयवः इति पदस्यार्थः अंशः। यथा

[42] तर्कसंग्रहः, सम्पादकः.नारायणचन्द्र गोस्वामी, पृष्ठासंख्या–३८७ ।

[43] न्यायदर्शन. कालिवरवेदान्तवागीशसम्पादकःदितम्, पृष्ठासंख्या–ख।

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśah)

अवयविनः पटस्य अवयवः तन्तुः, तथा अवयविनः न्यायस्य अवयवः वाक्यानि। तन्तुसंयोगे यथैव अवयविपटस्य निर्माणं भवति तथैव अवयववाक्यानां मिलनेन परमन्यायस्य सृष्टिर्भवति।

केनचित् जनेन पर्वते स्वयं धूमेन वह्नेः ज्ञानात् अनन्तरम् अपरं धूमसहायेन अप्रत्यक्षस्य वह्निज्ञानस्य उत्पादनार्थं यत् पञ्चावयववाक्यं प्रयुज्यते तत् परार्थानुमानम्। तर्कसंग्रहकारेण अन्नंभट्टेन उक्तम् ''यत्तु स्वयम् धूमादग्निमनुमानाय परप्रतिपत्त्यर्थं पञ्चावयववाक्यं प्रयुज्यते तत् परार्थानुमानम्"।[44] अर्थात् आत्मार्थं तत्त्वनिश्चयार्थं प्रयुक्तम् अनुमानं स्वार्थानुमानम्। परन्तु वादिप्रतिवादिनोः विप्रतिपत्तिवशात् विवादविषयेषु संशयः जायते। मध्यस्थजनस्य संशयनिवारणार्थं उभयौ एव स्वपक्षसाधनार्थं न्यायप्रयोगेन स्वमतसाधकम् अनुमानं प्रदर्शयतः। अनेन मध्यस्थजनस्य अनुमितिः जायते । अनुमानमिदं परार्थम्। अतः परार्थानुमानम् इति अभिधीयते। परन्तु अनेके परार्थानुमानम् इति नामकरणं न स्वीकुर्वन्ति। ते मन्यन्ते अनुमितेः हेतुः तथा तज्जनितः ज्ञानविशेषः अनुमानम्। परन्तु हेतुज्ञानयोः परार्थत्वं लोकप्रसिद्धं शास्त्रप्रसिद्धं च न। अतः उभयमेव परार्थं न ज्ञायते। यदि उक्तम् अनुमानबोधकस्य वाक्यस्य परार्थत्वहेतोः अनुमानं परार्थं तर्हि कश्यचित् जनस्य प्रत्यक्षबोधकवाक्यं परार्थत्वहेतोः प्रत्यक्षस्य अपि परार्थप्रसङ्गः आगच्छति। परन्तु प्रत्यक्षस्य परार्थं न स्वीक्रियते। समाधाने श्रीधरभट्टेन उक्तम् प्रतिज्ञादिवाक्यस्य परार्थत्ववशतः अनुमानमिदं परार्थानुमानं न। परन्तु परार्थवाक्यानि विवादस्थले मध्यस्थजनस्य अनुमितेः हेत्वर्थम् अतः अनुमानमिदं परार्थानुमानम्। न्यायमञ्जरीकारेण जयन्तभट्टेन उक्तम् ''तमेव परार्थानुमानमाचक्षते नीतिविदः''। 'तर्कसंग्रहदीपिका' इत्यस्यां टीकायां नीलकण्ठभट्टेन अनुमानस्य परार्थत्वं स्वीकृत्य उक्तम् ''तथापि परार्थानुमानप्रयोजके पञ्चावयववाक्ये 'परार्थानुमान' शब्दस्यौपचारिकः प्रयोग इति मनसि कृत्य मूलमवतारयत"। न्यायदर्शने परार्थानुमाने पञ्चावयववाक्यस्य प्रयोगः भवति। अवयवसहायेन परार्थानुमानं भवति। सूत्रकारेण

---

[44] तर्कसंग्रहः, सम्पादकः.नारायणचन्द्र गोस्वामी, पृष्ठासंख्या–३९५ ।

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśah)

गौतमेन उक्तम्–''प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः''।[45] अर्थात् परार्थानुमाने प्रतिज्ञा हेतुः उदाहरणम् उपनयः निगमनञ्च इति पञ्चावयवाः। न्यायदर्शनं द्विविधम्। यथा प्राचीनन्यायः नव्यन्यायश्चेति। आहार्यगङ्गेशोपाध्यायात् प्राक् न्यायदर्शनं प्राचीनन्यायः नामाभिधीयते। अत्र मया प्राचीनन्यायमवलम्ब्य अवयवविमर्षः उपस्थाप्यते।

**प्रतिज्ञा–**

पञ्चावयववाक्येषु आदौ अस्ति प्रतिज्ञा। न्यायसूत्रकारेण उक्तम्– ''साध्यनिर्द्देशः प्रतिज्ञा"।[46] साध्यस्य निर्द्देशः साध्यनिर्द्देशः। न्यायभाष्यकारेण 'साध्यस्य' इति पदस्य अर्थः क्रियते "प्रज्ञापनीयेन धर्मेण धर्मिणो विशिष्टस्य"। न्यायभाष्यकारेण 'निर्द्देशः' इति पदस्य अर्थः क्रियते ''परिग्रहवचनम्"। अर्थात् वादिप्रतिवादिनोः स्वमतानुसारं प्रतिपादनीयं धर्म्मेण विशिष्टधर्म्मिवोधकवाक्यं प्रतिज्ञा। 'साध्यः' इति शब्देन न्यायसूत्रकारः साध्यधर्म्मं तथा साध्यधर्म्मविशिष्टधर्म्मिं बोधयति। परन्तु अत्र 'साध्य' इति शब्देन साध्यधर्म्मविशिष्टधर्म्मी बोध्यते। अतः येन वाक्येन साधनीयधर्म्मविशिष्टधर्म्मी बोध्यते सा प्रतिज्ञा। नैयायिकाः शब्दस्य अनित्यत्वं स्वीकुर्वन्ति। परन्तु मीमांसकाः शब्दस्य नित्यत्वं स्वीकुर्वन्ति। अत्र शब्दस्य नित्यानित्यत्वविचारे मध्यस्थजनं निकषा नैयायिकाः प्रतिज्ञावाक्यंम् उत्थापयति "अनित्यः शब्दः"। अत्र अनित्यविशिष्टः शब्दः नैयायिकानां साध्यधर्म्मी।

तर्कभाषाकारेण केशवमिश्रेणापि उक्तम् "तत्र साध्यधर्मविशिष्टपक्षप्रतिपादकं वचनं प्रतिज्ञा''।[47]अर्थात् येन वाक्येन पक्षे साध्यनिर्देशः भवति तत् वचनं प्रतिज्ञा। पक्षेण सह साध्यस्य सम्बन्धप्रतिपादकं 'पक्षः साध्यविशिष्टं' एतादृशं वाक्यम् प्रतिज्ञा। यथा–''पर्वतोऽयं

---

45 न्यायसूत्रम् –१/१/३२

46 न्यायसूत्रम् –१/१/३३

47 तर्कभाषा, सम्पादकः.गङ्गाधर कर, पृष्ठासंख्या–५१२।

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśah)

वह्निमानिति''।[48] अत्र पर्वते धूमदर्शनेन वह्नेः ज्ञानात् अनन्तरम् अपरं वह्निज्ञानं उत्पादनाय कथ्यते अयं पर्वतः वह्निमान् इति। वचनमिदं प्रतिज्ञा।

नव्यनैयायिकेन अन्नंभट्टेन दीपिकाटीकायां प्रतिज्ञालक्षणम् उक्तम्–''साध्यवत्तया पक्षवचनं प्रतिज्ञा"।[49] अर्थात् साध्यविशिष्टपक्षस्य प्रतिपादकवचनं प्रतिज्ञा। अन्नंभट्टेन अत्र भिन्नभाषया प्रतिज्ञालक्षणं कृतम्।परन्तु अत्रापि तर्कभाषावत् पक्षे साध्यनिर्देशः भवति। यथा "पर्वतो वह्निमान्"।[50] अत्र उदाहरणमपि तर्कभाषावत्।

**हेतुः –**

पञ्चावयववाक्येषु द्वितीयावयववाक्यमस्ति हेतुः। न्यायसूत्रकारेण उक्तम् ''उदाहरणसाधर्म्यात् साध्यसाधनं हेतुः"।[51] परार्थानुमाने हेतुवाक्यस्य प्राधान्यमस्ति। हेतुवाक्यसहायेन वक्तव्यविषयं परप्रतिपत्त्यर्थं सहायता भवति।'हेतु' द्विविधम्–साधर्म्यहेतुः वैधर्म्यहेतुश्च। अत्र न्यायसूत्रकारेण साधर्म्यहेतोः लक्षणं प्रदीयते। ''उदाहरणेन सामान्यात् उदाहरणसाधर्म्यात्'' इति न्यायभाष्यकारस्य मतम्। 'उदाह्रियते दृष्टान्तरूपेण प्रदर्श्यते यत् उदाहरणम्" इति व्युत्पत्त्यनुसारेण 'उदाहरणम्' इति पदेन दृष्टान्तः पदार्थः बोध्यते। दृष्टान्तपदार्थेन सह साध्यधर्म्मिणः समानधर्म्मः एव 'उदाहरणसाधर्म्य' इति। साधर्म्यहेतुः तदा भवति यदा उदाहरणेन सह अन्वयदृष्टान्तः प्रदर्शितः भवति। 'साध्यसाधनम्' इति पदेन हेतुपदार्थस्य साध्यसाधनत्वबोधकवाक्यमेव वोध्यते। अतः दृष्टान्तपदार्थेण सह अन्वयरूपेण साधर्म्यवशतः साध्यसाधने समर्थवाक्यमेव हेतुवाक्यम्।

---

48 तर्कभाषा.सम्पादकः.गङ्गाधर कर, पृष्ठासंख्या–५१२।

49 तर्कसंग्रहः(दीपिका टीका),सम्पादकः.नारायणचन्द्र गोस्वामी, पृष्ठासंख्या–३९५।

50 तर्कसंग्रहः (दीपिका टीका), सम्पादकः.नारायणचन्द्र गोस्वामी, पृष्ठासंख्या–३९५।

51 न्यायसूत्रम्–१/१/३४

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśah)

प्रतिज्ञावाक्यम् आसीत् ''अनित्यः शब्दः''। अत्र हेतुवाक्यं–''उत्पत्तिधर्म्मकत्वात्''। अत्र उत्पत्तिधर्म्मकत्वरूपः धर्म्म एव हेतुपदार्थः। घटादिपदार्थस्य उत्पत्तिः भवति। अतः घटः अनित्यः। यस्य उत्पत्तिधर्म्मत्वम् अस्ति सः अनित्यः। अतः अन्वयरूपेण उदाहरणेन सह साधर्म्म्यवशतः – 'उत्पत्तिधर्म्मकत्वात्' हेतुः साधर्म्म्यहेतुः।

न्यायसूत्रकारेण वैधर्म्म्यहेतोः लक्षणं कृतम् ''तथा वैधर्म्म्यात्"।[52] न्यायभाष्यकारेण उक्तम् ''उदाहरणवैधर्म्म्यात् च साध्यसाधनं हेतुः"।[53] वैधर्म्म्यदृष्टान्तपदार्थस्य वैधर्म्म्यप्रयुक्तं साध्यसाधनत्वबोधकवाक्यं हेतुः। यथा–''अनित्यः शब्दः, उत्पत्तिधर्म्मकत्वात्, अनुत्पत्तिधर्म्मकं नित्यं,यथा आत्मादि द्रव्यमिति''। अर्थात् उक्तरूपेण प्रतिज्ञादिप्रयोगस्थले उदाहरणवाक्येन आत्मादि द्रव्यरूपं वैधर्म्म्यदृष्टान्तः प्रदर्शनात् पूर्वोक्तः ''उत्पत्तिधर्म्मकत्वात्' वाक्यं 'वैधर्म्म्य हेतुः''।

तर्कभाषाकारेण केशवमिश्रेण उक्तम् ''तृतीयान्तं पञ्चम्यन्तं वा लिङ्गप्रतिपादकं वचनं हेतुः''।[54] अर्थात् व्याप्तिविशिष्टहेतोः हेतोः प्रतिपादनकारीवचनं हेतुः। हेतुवाक्यं तृतीयाविभक्त्यन्तं पञ्चमीविभक्त्यन्तं वा भवति। तर्कभाषायां प्रतिज्ञावाक्यम् आसीत् 'पर्वतोऽयं वह्निमानिति'। अत्र हेतुवाक्यम् यथा ''धूमवत्त्वेन धूमवत्त्वादिति वा''। यत्र यत्र धूमः अस्ति तत्र तत्र वह्निः अस्ति। अतः धूमवह्न्योः व्याप्तिसम्वन्धः अस्ति। वह्निज्ञाने अत्र हेतुः धूमः। हेतुः अत्र तृतीयाविभक्त्यन्तं पञ्चमीविभक्त्यन्तं वा भवति। अनेन हेतुना पर्वते अर्थात् पक्षे साध्यज्ञानम् अर्थात् वह्नेः ज्ञानम् भवति।

---

[52] न्यायसूत्रम्-- १/१/३५

[53] न्यायदर्शन, सम्पादकः.फणिभूषण तर्कवागीश, पृष्ठासंख्या–३००।

[54] तर्कभाषा, सम्पादकः.गङ्गाधर कर, पृष्ठासंख्या– ५१२।

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśaḥ)

नव्यनैयायिकेन अन्नंभट्टेन दीपिकाटीकायाम् हेतुलक्षणम् उक्तम्–''पञ्चम्यन्तं लिङ्गप्रतिपादकं वचनं हेतुः"।[55] अर्थात् हेतुप्रतिपादकं पञ्चमीविभक्तियुक्तवाक्यं हेतुवाक्यम्। यथा ''धुमवत्त्वात्।'' अत्र अन्नंभट्टेन तर्कभाषावत् व्याख्यातम्। परन्तु अन्नंभट्टेन उक्तम् हेतुवाक्यं पञ्चमीविभक्तियुक्तं भवति।

**उदाहरणम्–**

पञ्चावयववाक्येषु तृतीयावयववाक्यमस्ति उदाहरणम्। उदाहरणशब्दस्य व्युत्पत्तिना अस्यार्थः प्राप्यते। ''उदाह्रियते धर्म्मयोः साध्य–साधनभावो येन वाक्येन"। अर्थात् येन वाक्येन हेतुपदार्थस्य अनुमेयधर्मस्य च साध्यसाधनभावसम्वन्धः बोध्यते तत् उदाहरणम्। उदाहरणं द्विविधम्–साधर्म्म्योदाहरणं वैधर्म्म्योदाहरणं च। न्यायसूत्रकारेण उदाहरणद्वयस्य लक्षणं कृतम् ''साध्यसाधर्म्म्यात्तद्धर्म्मभावी दृष्टान्त उदाहरणम्।', 'तद्विपर्ययात् वा''।[56] अत्र न्यायसूत्रकारेण भणितं यत् "दृष्टान्त उदाहरणम्।'' अर्थात् दृष्टान्तपदार्थमेव उदाहरणम्। परन्तु दृष्टान्तः वाक्यं न। कथं तस्य उदाहरणसंज्ञा भवितुम् शक्नोति? उद्द्योतकारेण उक्तम् महर्षिः अत्र 'दृष्टान्त'– शब्देन स्वतन्त्रदृष्टान्तपदार्थस्य ग्रहणं न करोति। अत्र वचनस्य विशेषणरूपेण दृष्टान्तः इति पदार्थस्य ग्रहणं भवति। अर्थात् अत्र दृष्टान्तपदार्थबोधकवाक्यविशेषम् उदाहरणम्। केन प्रकारेण दृष्टान्तबोधकवाक्यं 'साधर्म्म्योदाहरणम्'? महर्षिणा उक्तम् ''साध्यसाधर्म्म्यात्तद्धर्म्मभावी दृष्टान्तः"। साध्यधर्म्मिणः यस्मिन् पदार्थे विद्यते स एव साधर्म्म्यदृष्टान्तः अन्वयदृष्टान्तः वा। तादृशं दृष्टान्तबोधकं वाक्यं साधर्म्म्योदाहरणवाक्यम्।

पूर्वोक्तस्य 'उत्पत्तिमत्वात्' इति हेतुवाक्यस्यानन्तरं 'यो यो उत्पत्तिमान् स अनित्यः, यथा घटः'इति वाक्यं साधर्म्म्योदाहरणवाक्यम्। भाष्यकारेण उक्तम् पूर्वोक्तस्थले आत्मादिव्यातिरेकदृष्टान्तग्रहणेन कथितवाक्यमेव वैधर्म्म्योदाहरणवाक्यम्। परन्तु उद्द्योतकारेण

---

55 तर्कसंग्रहः.(दीपिका टीका),सम्पादकः.नारायणचन्द्र गोस्वामी, पृष्ठासंख्या–३९५।

56 न्यायसूत्रम्– १/१/३६–३७

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśah)

उक्तम् यत्र अन्वयदृष्टान्तः न भवति तत्र व्यातिरेकदृष्टान्तेन कथितवाक्यमेव वैधर्म्योदाहरणवाक्यम्।

तर्कभाषाकारेण केशवमिश्रेण तर्कभाषायाम् उक्तम ''सव्याप्तिकं दृष्टान्तवचनमुदाहरणम्''।[57] अर्थात् यत्र व्याप्तिना सह दृष्टान्तस्य कथनं भवति तत् उदाहरणम्। अत्र व्याप्तिविशिष्टहेतोः अधिकरणेन सह हेतुव्यापकसाध्यसाधिकरणस्य अभेदः प्रतिपादितः भवति। यथा ''यो यो धूमवान् स स वह्निमान्, यथा महानसम्"। अस्मिन् वाक्ये हेतोः धूमस्य अधिकरणं महानसेन सह हेतुव्यापकसाध्यस्य अर्थात् वह्नेः अधिकरणस्य अभेदः प्रतिपादितः भवति। अतः वाक्यमिदम् उदाहरणम्।

नव्यनैयायिकेन अन्नंभट्टेन दीपिकाटीकायाम् उदाहरणलक्षणम् उक्तम् ''व्याप्तिप्रतिपादकं वचनमुदाहरणम्''।[58] अर्थात् येन वाक्येन हेतुसाध्ययोः व्याप्तिः अर्थात् सम्वन्धः प्रतिपाद्यते तत् उदाहरणवाक्यम्। यथा–''यो यो धूमवान् स सः अग्निमान्,यथा महानसः"। अत्रापि अन्नंभट्टेन तर्कभाषावत् उदाहरणं व्याख्यातम्।

**उपनयः–**

पञ्चावयववाक्येषु चतुर्थावयववाक्यमस्ति उपनयः। यतः उदाहरणं द्विविधम्। अतः 'उपनयः' अपि द्विविधः। यथा साधर्म्योपनयः वैधर्म्योपनयश्च। महर्षिणा गौतमेन उक्तं– ''उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः''।[59] अर्थात् साध्यधर्मे पूर्वोक्तोदाहरणवाक्यानुसारेण 'तथा','न तथा' च इति रूपेण यत् उपसंहारवाक्यं तत् उपनयः।

यथा 'शब्दः अनित्यः,उत्पत्तिधर्मकत्वात्' इति न्यायवाक्यस्थले नैयायिकेन यदि'यथा घटः'इति रूपेण साधर्म्योदाहरणवाक्यम् उक्तम्, तर्हि अत्र उपनयवाक्यं भविष्यति

---

57 तर्कभाषा, सम्पादकः.गङ्गाधर कर, पृष्ठासंख्या–५१२।

58 तर्कसंग्रहः.(दीपिका टीका),सम्पादकः.नरायणचन्द्र गोस्वामी, पृष्ठासंख्या–३९५।

59 न्यायसूत्रम्. १/१/३८

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśah)

''तथाचोत्पत्तिधर्म्मकः शब्दः''। वाक्यमिदं साधर्म्योपनयः। अनेन बोध्यते शब्दः अपि घटवत् उत्पत्तिविशिष्टः। नैयायिकेन यदि'यथा आत्मा' इति रूपेण वैधर्म्योदाहरणवाक्यम् उक्तम् तर्हि अत्र वैधर्म्योपनयवाक्यं भविष्यति–''न च तथानुत्पत्तिधर्मकः शब्दः''। अनेन बोध्यते शब्दः आत्मनः इव उत्पत्तिधर्मविशिष्टः न।

तर्कभाषाकारेण केशवमिश्रेण उक्तम् ''पक्षे लिङ्गोपसंहारवचनमुपनयः''।[60]अर्थात् पक्षे लिङ्गस्य उपसंहारवचनम् अर्थात् शाब्दनिश्चयकवचनम् उपनयः। अनेन वाक्येन पक्षेण सह साध्यव्याप्तिविशिष्टहेतोः सम्वन्धप्रतिपादनं भवति। प्रतिज्ञा–हेतु–उदाहरणवाक्यानाम् क्रमानुयायि प्रतिपादनात् अनन्तरम् 'तथा च अयम्' अर्थात् 'साध्यव्याप्यहेतुमान् अयम्' इत्यस्मिन् रूपे प्रयुक्तं वाक्यम् उपनयः।

उपनयवाक्यम् उदाहरणवाक्यम् अनुसरति। अनेन कारणेन उदाहरणतः यदि अन्वयव्याप्तेः बोधः भवति तर्हि उपनयवाक्येन पक्षे साध्यस्य अन्वयव्याप्तिविशिष्टहेतोः वोधः भवति। अथवा उदाहरणेन यदि व्यातिरेकव्याप्तेः वोधः भवति तर्हि उपनयवाक्येन व्यातिरेकव्याप्तिविशिष्टहेतोः बोधः भवति। अतः उपनयवाक्यस्वरूपं कदापि 'तथा च अयम्', कदापि 'तथा च न अयम्' इत्यादि रूपेण प्रतिपादितं भवति। 'तथा च अयम्' इत्यत्र 'वह्निव्याप्यधूमवान् अयं पर्वतः' इत्यस्य बोधः भवति।

नव्यनैयायिकेन अन्नंभट्टेन दीपिकाटीकायाम् उपनयलक्षणम् उक्तम्– ''व्याप्तिविशिष्टलिङ्गप्रतिपादकं वचनमुपनयः''।[61] अर्थात् व्याप्तिविशिष्टः लिङ्गःअर्थात् हेतुप्रतिपादकं वचनम् उपनयः। अत्र अन्नंभट्टेन हेतोः व्याख्यानं यथार्थं कृतम्। यथा 'तथा चायम्'। उदाहरणम् अन्नंभट्टेन तर्कभाषावत् व्याख्यातम्।

---

60 तर्कभाषा, सम्पादकः.गङ्गाधर कर, पृष्ठासंख्या–५१२।

61 तर्कसंग्रहः.(दीपिका टीका),सम्पादकः.नारायणचन्द्र गोस्वामी, पृष्ठासंख्या–३९५।

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśah)

**निगमनम्–**

पञ्चावयववाक्येषु पञ्चमावयववाक्यमस्ति निगमनम्।गौतमेन उक्तम् ''हेत्वपदेशात् प्रतिज्ञायाः पुनर्व्वचनं निगमनम्''।[62] न्यायभाष्यकारेण कथ्यते प्रतिज्ञावाक्यात् परं कथितस्य हेतुवाक्यस्य उल्लेख्यपूर्वकं प्रतिज्ञावाक्यस्य पुनर्वचनं निगमनम्। अत्र प्रतिज्ञावाक्यमासीत् 'अनित्यः शब्दः'। अतः अत्र निगमनवाक्यं भविष्यति ''तस्मादुत्पत्तिधर्म्मकत्वातनित्यः शब्दः''।

तर्कभाषाकारेण केशवमिश्रेण उक्तम् ''पक्षे साध्योपसंहारवचनं निगमनम्"।[63] अर्थात् हेतुज्ञानव्याप्यसाध्यवत् पक्षबोधजनकवाक्यं निगमनवाक्यम्। अत्र पुनः प्रतिज्ञायाः पुनर्वचनं भवति। अत्र पक्षे प्रतिज्ञायाः परिसमाप्तिः भवति। यथा 'तस्मात् तथा' अर्थात् पर्वतोऽयं वह्निमान् अनेन रूपेण साध्यस्य सिद्धिः पक्षे भवति।

नव्यनैयायिकेन अन्नंभट्टेन दीपिकाटीकायाम् निगमनलक्षणम् उक्तम् ''हेतुसाध्यवत्तया पक्षप्रतिपादकं वचनं निगमनम्''।[64] यथा 'तस्मात् तथेति'। उदाहरणम् अन्नंभट्टेन तर्कभाषावत् व्याख्यातम्। परन्तु अत्र प्रश्नः आगच्छति प्रतिज्ञावाक्यस्य यदि पुनर्वचनं निगमनं भवति तर्हि निगमनवाक्यस्य आवश्यकता कथम्? परन्तु नैयायिकेन उक्तम् आवश्यकता अस्ति। यद्यपि निगमनवाक्यस्य परभागः प्रतिज्ञावाक्यं च आकारगतरूपेण समानं तथापि अवयववाक्यद्वयोः भिन्नता अस्ति। प्रतिज्ञावाक्येन यस्य पदार्थस्य साध्यरूपेण बोधः भवति निगमनवाक्येन तस्य पदार्थस्य सिद्धिरूपेण वोधः भवति। अतः प्रतिज्ञानिगमनयोः भेदः अस्ति।

पञ्चावयववाक्यस्य प्रयोजनं अन्नंभट्टेन दीपिकाटीकायामुक्तं ''पक्षज्ञानं प्रतिज्ञाप्रयोजनम्। लिङ्गज्ञानं हेतुप्रयोजनम्। व्याप्तिज्ञानमुदाहरणप्रयोजनम्। पक्षधर्मज्ञानमुपनयनप्रयोजनम्।

---

62 न्यायसूत्रम्. १/१/३९

63 तर्कभाषा., सम्पादकः.गङ्गाधर कर, पृष्ठासंख्या–५१२।

64 तर्कसंग्रहः.(दीपिका टीका),सम्पादकः.नारायणचन्द्र गोस्वामी, पृष्ठासंख्या–३९।

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśah)

अवाधितत्वादिकं निगमनप्रयोजनम्"।[65] अर्थात् प्रतिज्ञावाक्येन पक्षज्ञानं भवति। हेतुवाक्येन लिङ्गज्ञानं भवति। उदाहरणवाक्येन व्याप्तिज्ञानं भवति। पक्षधर्मतायाः ज्ञानम् उपनयवाक्यस्याप्रयोजनम्। पक्षे वाधितत्वादिदोषरहितार्थं निगमनवाक्यस्य प्रयोजनम्।

**निष्कर्षः–**

अज्ञातविषयज्ञानाय प्रमाणमावश्यकम्। ज्ञातविषयस्य अपरनिमित्तं ज्ञातार्थमपि प्रमाणमावश्यकम्। अनुमानप्रमाणेन ज्ञातविषयस्य अपरज्ञातार्थं परार्थानुमानम् आवश्यकम्। न्यायवैशेषिकनये परार्थानुमानस्य आलोचना परिदृश्यते। परन्तु अत्र व्याख्याने विभेदः अस्ति। न्यायदर्शने परार्थानुमाने प्रतिज्ञा हेतुः उदाहरणम् उपनयनं निगमनं च इति पञ्चावयववाक्यानि सन्ति। वैशेषिकदर्शने परार्थानुमाने प्रतिज्ञा अपदेशः निदर्शनम् अनुसन्धानम् प्रत्यम्नायश्च इति पञ्चावयववाक्यानि व्याख्यायन्ते । परन्तु न्यायवैशेषिकैः समानतन्त्रदर्शनम्।

समालोचनायाम् अत्र प्राप्यते पञ्चावयववाक्यानि परार्थानुमानस्वरूपम्। पञ्चावयवेन वाक्येन परार्थानुमानं न भवति। पञ्चावयववाक्यानि अत्र परार्थानुमानस्वरूपम्। अवयवाक्यानाम् व्याख्यानं कृत्वा अत्र प्राप्यते न्यायदर्शने प्रतिज्ञावाक्यं वैशेषिकदर्शनस्य प्रतिज्ञावाक्यवत्। न्यायदर्शने हेतुवाक्यं वैशेषिकदर्शनस्य अपदेशवाक्यवत्। न्यायदर्शने उदाहरणवाक्यं वैशेषिकदर्शनस्य निदर्शनवाक्यवत्। न्यायदर्शने उपनयनवाक्यं वैशेषिकदर्शनस्य अनुसन्धानवाक्यवत्। न्यायदर्शने निगमनवाक्यं वैशेषिकदर्शनस्य प्रत्यम्नायवाक्यवत्। अत्र परार्थानुमानम् इति समानविषयः परन्तु विषयव्याख्यायां भेदः अस्ति। यतः महाभारतस्य वनपर्वणि उक्तम्

"वेदा विभिन्नाः स्मृतयो विभिन्नाः।
नासौ मुनिर्यस्य मतं न भिन्नम्"॥

वैशेषिकदर्शनस्य पश्चात् न्यायदर्शनम् आविर्भूतं भवति। परन्तु न्यायवैशेषिकयोः विषयदृष्ट्या सिद्धान्तदृष्ट्या च अधिकसाम्यं परिलक्ष्यते। परन्तु अनुमानप्रमाणविषये विशेषतः

65 तर्कसंग्रहः.(दीपिका टीका),सम्पादकः. नारायणचन्द्र गोस्वामी, पृष्ठासंख्या– ३९५।

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśah)

परार्थानुमानविषये भेदः परिलक्ष्यते। अस्य भेदस्य कारणं प्रधानतः कालव्यवधानम्। समयव्यवधानवशतः व्याख्यानं परिवर्तितं भवति। जनानां बोधार्थं वैशेषिकदर्शनस्य अवयववाक्यानां संज्ञाविषये परिवर्तनं भवति। न केवलं संज्ञायाम् अपि तु अवयवानां लक्षणेऽपि परिवर्तनं साधितं भवति। यद्यपि न्यायः वैशेषिकश्च समानतन्त्रदर्शनम् तथापि अत्र भेदः परिलक्ष्यते। अनेन परिवर्तनेन परार्थानुमानं सरलं भवति। न केवलं सरलम् अपि तु स्वानुमितविषयः अनायासेन अपराय ज्ञापयितुं शक्यते इति।

**ग्रन्थानुक्रमणिका–**

१. *अन्नंभट्टः, तर्कसंग्रहः*, सम्पादकः.अरविन्द वसु, कलकाता, मित्रम्, २०१० आङ्गलाब्दः; प्रथमप्रकाशनम्।

२. *अन्नंभट्टः, तर्कसंग्रहः*, सम्पादकः.नारायणचन्द्रगोस्वामी, कलकाता, संस्कृत पुस्तक भाण्डार, १४१३ वङ्गाब्दः २००६ आङ्गलाब्दः (तृतीयसंस्करणस्य पुनर्मुद्रणम्)।

३. अन्नंभट्टः, *तर्कसंग्रहः,* सम्पादकः.श्रीसत्कारिशर्मावङ्गीयः, वाराणसी, चौखाम्वा संस्कृतसंस्थानम्, २०६८ वि. सं. २०१२ आङ्गलाब्दः।

४. अमरसिंहः, *अमरकोषः(सटीकानुवादः),* सम्पादकः.गुरुदासविद्यानिधिः, कलकाता, संस्कृत पुस्तक भाण्डार, १४१७ वङ्गाब्दः २०१० आङ्गलाब्दः।

५. केशवमिश्रः, *तर्कभाषा,* सम्पादकः. सर्वानि गाङ्गुली विजया गोस्वामी च, कलकाता, संस्कृत पुस्तक भाण्डार, २००५ आङ्गलाब्दः; प्रथमसंस्करणम्।

६. केशवमिश्रः, *तर्कभाषा; प्रथम खण्ड,* सम्पादकः.श्री गङ्गाधर कर न्यायाचार्य, कलकाता, यादवपुर विश्वविद्यालय प्रकाशना, २०१३ आङ्गलाब्दः; द्वितीयप्रकाशनम्।

७. गङ्गोपाध्याय मृणालकान्ति, *भाषापरिच्छेदे सप्त पदार्थ,* कलकाता, संस्कृत वुक डिपो, १४२१ वङ्गाब्दः; प्रथमसंस्करनम्।

८. गौतमः, *न्यायदर्शनम्(तृतीयखण्डम्),* अनुवादक: व्याख्याता च फणिभूषणतर्कवागीशः, कलकाता, पश्चिमवङ्गराज्य पुस्तक पर्षद्,२०००(द्वितीयमुद्रणम्)।

९. गौतमः, *न्यायदर्शनम्(*प्रथमखण्ड), अनुवादकः व्याख्याता च फणिभुषणतर्कवागीशः, कलकाता, पश्चिमवङ्गराज्यपुस्तक पर्षद्, २०१४(पञ्चमप्रकाशनम्)।

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśah)

१०. गौतमः, *न्यायदर्शणम्(वात्सायन कृत भाष्यसह)*, अनुवादकः व्याख्याता च कालीवरवेदान्तवागीशः, कलकाता, संस्कृत पुस्तक भाण्डार, २०१६आङ्गलाब्दः।

११. गौतमः,*न्यायदर्शनम्*, सम्पादकः.तारानाथन्यायतर्कतीर्थः, नई दिल्ली, मुश्रिराम मनोहरलाल पावलिशार्स,२००३।

१२. जगदीशतर्कालङ्कारः, *तर्कामृतम्*, सम्पादकः. तपनशंकरभट्टाचार्य्यः, कलकाता, संस्कृत पुस्तक भाण्डार, २००९ प्रथमसंस्करणम्।

१३. तर्कवागीशः फणिभुषणः, *न्यायपरिचयः*, कलकाता, पश्चिमवङ्गराज्यपुस्तक पर्षद्, २००६(तृतीयमुद्रणम्)।

१४. त्रिपाठी यदुपति, *भारतीय दर्शन परिचय*, कलिकाता, वि. एन्. पाव्लिकेशन्, २०१० आङ्गलाब्दः; द्वितीयमुद्रणम्।

१५. प्रशस्तपादः, *प्रशस्तपादभाष्यम्(द्वितीय भागः)*, सम्पादकः. ब्रह्मचारी मेधाचैतन्य, कलकाता, संस्कृत वुक डिपो, जानुयारी २०१७, (द्वितीयमुद्रणम्)।

१६. प्रशस्तपादः, *प्रशस्तपादभाष्यम्*; 'प्रकाशिका'–हिन्दीव्याख्याविभूषितम्, सम्पादकः.अचार्य ढुण्डिराज शास्त्री, वाराणसी, चौखाम्वा संस्कृत संस्थान,२०७३ वि.सं, २०१६ आङ्गलाब्दः, (पुनमुद्रणम्)।

१७. प्रशस्तपादः, *प्रशस्तपादभाष्यम्*, हिन्दीव्याख्याकारःसम्पादकःदकश्च. पण्डितश्रीदूर्गाधरझाशार्मा, चौखाम्वाविद्याभवन, वाराणसी, २००२ आङ्गलाब्दः, (पुनर्मुद्रणम्)।

१८. पाणिनिः, *अष्टाध्यायी*, सम्पादकः.तपनशङ्करभट्टाचार्य्यः, कलकाता, संस्कृत वुक डिपो, २०१२(प्रथमसंस्करणस्य पुनर्मुद्रणम्)।

१९. भट्टाचार्य श्रीमोहन भट्टाचार्य श्रीदीनेशचन्द्र च, *भारतीय दर्शन कोष; प्रथम खण्ड*, कलकाता, संस्कृत कलेज,१३८३ वङ्गाब्दः।

२०. भट्टाचार्य श्रीमोहन भट्टाचार्य श्रीदीनेश चन्द्र च, *भारतीय दर्शन कोष; तृतीय खण्ड*, कलकाता, संस्कृत कलेज,१३८३ वङ्गाब्दः।

२१. भट्टाचार्य समरेन्द, *भारतीयदर्शनम्*, कलकाता, वुक सिण्डिकेट प्राइभेटलिमिटेड, २०१०(पुनमुद्रणम्)।

२२. मनु, *मनुसंहिता*, सम्पादकः.ड. मानवेन्दुवन्द्योपाध्यायशास्त्री, कोलकाता, सदेश, १४१८ वङ्गाब्दः; द्वितीयप्रकाशन।

२३. मन्डल प्रद्योत कुमार, *प्रशस्तपादेर दर्शन*, कलकाता, पश्चिमवङ्ग राज्य पुस्तक पर्षत्, २०१२ आङ्गलाब्दः; प्रथममुद्रनम्।

ISSN: 2583-4630
सुरधुनी (Suradhunī)
अन्तरराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-2, Issue-1, December-2022,
Name of Issuing- शब्दार्थतत्त्वविमर्शः (Śabdārthatattvavimarśah)

२४. माधवाचार्यः, *सर्वदर्शनसंग्रहः(चार्वाकबौद्धजैनदर्शनानि)*, सम्पादकः.अमितभट्टाचार्यः, कलकाता, संस्कृत पुस्तक भाण्डार, २०१३।

२५. मिश्र जगदीशचन्द्र, *भारतीयदर्शनम्,* वाराणसी, चौखम्बा सुरभारती प्रकाशन, २०१६ आङ्गलाब्दः।

२६. वात्स्यायनः, *न्यायभाष्यम्,* सम्पादकः.अनन्तलालठाकुरः, नई दिल्ली, भारतीयदार्शनिकानुसंधानपरिषत्, १९९७।

२७. वामनदेवसेनापतिः, *समानतन्त्रविमर्शः,* कलकाता, तपति पाव्लिकेशन, २०१७(प्रथमसंस्करणम्)।

२८. विश्वनाथः, *भाषापरिच्छेदः,* सम्पादकः. मृणालकान्ति गङ्गोपाध्याय, कलकाता, संस्कृत वुक डिपो, २०१७ आङ्गलाब्दः; द्वितीयप्रकाशनम्।

२९. विश्वनाथः,*भाषापरिच्छेदः(सिद्धान्तमुक्तावलीटीकासहिता)*, सम्पादकः.पञ्चाननशास्त्री, कलकाता, महाबोधि वुक एजेन्सि, २०१६(प्रथमसंस्करणस्यपुनर्मुद्रणम्)।

३०. विश्वनाथन्यायपञ्चानन, *न्यायसूत्रवृत्तिः,* सम्पादकः अनुवादकङ् व्याख्याता च सेख साविर आलि, संस्कृत पुस्तक भाण्डार, २०१५ आङ्गलाब्दः, प्रथमप्रकाशनम्।

३१. श्रीशालिकानाथः, *प्रकरणपञ्चिका; प्रमानपारायणे अनुमानपरिच्छेदः*, सम्पादकः. तपनशङ्करभट्टाचार्य्यः, कलिकाता, संस्कृत पुस्तक भाण्डार, २०११ आङ्गलाब्दः; प्रथमसंस्करणम्।

३२. सेन देवव्रत, *भारतीय दर्शन*, कलकाता, पश्चिमवङ्ग राज्य पुस्तक पर्षत्, २०१४ आङ्गलाब्दः; तृतीयसंस्करणस्य द्वितीयमुद्रणम्।

३३. Mukhopadhyaya Gobindagopal.*A New Tri-Lingual Dictionary.* Kolkata: Sanskrit Book Depot, 2008(First Edition, Reprint).

३४. Sharma, Chandradhar. *A Critical Survey of Indian Philosophy.*

३५. Deehi: Motilal Banarsidass publishers, 2013 13th Reprint.

ISSN: 0587-1646

# अन्वीक्षा

# ANVĪKṢĀ

## RESEARCH JOURNAL
OF THE DEPARTMENT OF SANSKRIT
[ Peer Reviewed Journal ]

**VOLUME XLIV**
**RITA CHATTOPADHYAY COMMEMORATION VOLUME**
**PART II**

General Editor
**Prof. Tapan Sankar Bhattacharyya**
Joint Editor
**Prof. Kakali Ghosh**

**JADAVPUR UNIVERSITY**
Kolkata 700 032

**January 2023**

ISSN: 0587-1646

# अन्वीक्षा

# ANVĪKṢĀ

RESEARCH JOURNAL OF THE DEPARTMENT OF SANSKRIT
[PEER REVIEWED JOURNAL]

VOLUME XLIV

RITA CHATTOPADHYAY COMMEMORATION VOLUME

PART II

GENERAL EDITOR
PROF. TAPAN SANKAR BHATTACHARYYA

JOINT EDITOR
PROF. KAKALI GHOSH

JADAVPUR UNIVERSITY
KOLKATA 700 032

JANUARY 2023

EDITORIAL BOARD

PROF. TAPAN SANKAR BHATTACHARYYA (GENERAL EDITOR)

PROF. KAKALI GHOSH (JOINT EDITOR)

PROF. RATNA BASU

PROF. TAPATI MUKHERJEE

PROF. DEBARCHANA SARKAR

PROF. SATYAJIT LAYEK

PROF. INDIRA CHATTERJEE

PROF. ASHOK KUMAR MAHATA

PROF. SHIULI BASU

**PRICE- RS. 600.00**

PUBLISHED BY REGISTRAR, JADAVPUR UNIVERSITY, KOLKATA 700 032

&

PRINTED BY CHOWDHURY PRESS, 242/2D, APC ROAD, KOLKATA 700 004

COVER DESIGN BY SRI ABHIRUP DE

Anvīkṣā Website Link: https://jusanskritjournal.in/

যাদবপুর বিশ্ববিদ্যালয়
কলকাতা - ৭০০০৩২, ভারত
ফোন : ২৪১৪-৬১১৫

JADAVPUR UNIVERSITY
KOLKATA-700 032, INDIA
Telephone : 2414-6115

FACULTY OF ARTS, DEPARTMENT OF SANSKRIT

Ref. No. ..........................                                                  Date ..............................

# GENERAL EDITOR'S NOTE

We are extremely delighted to announce that the latest online issue of *Anvīkṣā* (Vol. XLIV), the trilingual journal of the Department of Sanskrit, Jadavpur University is ready for publication before our estimable readers. From the beginning of its journey, the journal used to be published in printed form only. It's a matter of great pride that our departmental journal has started its journey through online mode along with its printed form in the previous year.

The online edition of the journal has been appeared with the combined effort of Prof. Kakali Ghosh and all the honourable teachers of our department. We candidly admit that the demand of the age is irresistible. So, we believe that the new form of our journal will fulfil the necessity of the digital generation.

We observed that the valuable research articles of famous writers have enhanced the quality of the journal for a long time. Side by side, we believe that the modern generation can show the new direction of advancement certainly. That is why, we would like to inspire the young scholars for their endeavor through deliberative contributions. Therefore, we have increased the number of pages to encourage the young writers in the field of Sanskrit studies.

The present issue of our journal contains valuable articles written by the scholars and experts of their concerned fields of various renowned educational institutions. I hope that the readers will be involved with us through their valuable opinions and suggestions to complete the endeavor of the Department of Sanskrit.

"तेजस्वि नावधीतमस्तु"

Tapansankar Bhattacharyya

January 26, 2023

Dr. Tapan Sankar Bhattacharyya
Professor & Head of the Department of Sanskrit
Jadavpur University, Kolkata 700 032

যাদবপুর বিশ্ববিদ্যালয়
কলকাতা - ৭০০০৩২, ভারত
ফোন : ২৪১৪-৬১১৫

JADAVPUR UNIVERSITY
KOLKATA-700 032, INDIA
Telephone : 2414-6115

FACULTY OF ARTS, DEPARTMENT OF SANSKRIT

*Ref. No.* ..........................                                                    *Date* ..........................

# JOINT EDITOR'S NOTE

The grand play of primordial power has given rise to myriads of manifestations, which are in a state of perpetual flux. The ever-changing modes of nature bring about changes in all worldly forms every moment, and as such, man is bewildered and baffled to dwell amidst the world of changefulness. He is a tiny boat at the mercy of destiny, as it were, tossed up here and there in the whirlpool of changes. The turmoil arising out of this turbulence fills life with unceasing dismay from which there is no escape. The ancient sages of India, with their all-encompassing vision, captured the essence of Truth at the core of their heart. They realized that amidst the vortex of changefulness, there exists a unitary and benign principle- *śāntaṁ-śivam-advaitam-* which rests in the calmness of tranquillity. This self-sustaining principle which is essentially of the nature of knowledge is the support of the world of relativities. There is nothing so elevating as knowledge and, therefore, the cultivation of knowledge, in all its forms, has become the eternal pursuit of mankind which can lead to the abode of peace.

The Department of Sanskrit, bearing the legacy of the ancient knowledge tradition, is engaged with its earnest zeal in the cultivation of knowledge. As the chill of the winter gradually fades away and the cuckoo heralds the advent of the splendour of spring, nature seems to be embellished with blossoms and greenery making for an ideal ambience to offer our supplication to Devī Sarasvatī, the Goddess of learning for the sublimation of thoughts. The department, as a whole with all its components, stands in devotion and humility, with a basket of serene flowers, the *Anvīkṣā*, as the offering to the goddess of learning. May the blessings of 'Vāk', who is described as the primordial reality in the Vedas, impel the awakening of our 'Dhī'.

This volume of *Anvīkṣā*, which is an esteemed research journal in the field of Sanskrit and Indic studies, is a fruit of the sincere effort of the Department towards the expansion of the horizon of knowledge. Serious scholars, acclaimed intellectuals, dedicated researchers, and sincere students have enriched it with their invaluable contributions. The works of potential researchers and naive writers have also found a place in it. The conglomeration of the masterpieces of the masterminds has made it an exquisite piece of work.

We mourn, with a heart laden with sorrow, the sad demise of Prof. Rita Chattopadhyay, the erstwhile Professor of the Department who was a stalwart in the field of Modern Sanskrit literature. The Department in the past has received immense inspiration and support in all its academic activities from her. The demise of such an accomplished personality is undoubtedly an enormous loss not only to the department but also to the world of Sanskrit at large. We are privileged to dedicate the journal to the haloed memory of the departed soul.

This volume comprises two parts. Each of the two parts comprises three sections. In Section A, invited research articles from distinguished scholars of various reputed institutions have been compiled. Section B consists of the peer reviewed articles of teachers of several educational institutions. Section C is containing the peer reviewed articles of MPhil and PhD research scholars and students of graduation and post-graduation classes.

I fervently hope that *Anvīkṣā* by divine grace will captivate the hearts of connoisseurs with its ineffable radiance and charming fragrance.

Kakali Ghosh.

Dr. Kakali Ghosh
Professor, Department of Sanskrit
Jadavpur University, Kolkata 700 032

January 26, 2023

# PART - II

## CONTENTS

### SECTION A


| | TITLE | AUTHOR | | PAGE |
|---|---|---|---|---|
| 1. | **OBITUARY OF PROFESSOR RITA CHATTOPADHYAY (1952-2022)** | DEBARCHANA SARKAR | : | 1-2 |
| 2. | **व्यवहारधर्मः** | व्रजकिशोर-स्वाँइः | : | 3-21 |
| 3. | **THE *EDITIO PRINCEP* OF ARJUNAMIŚRA'S COMMENTARY ON THE CONCLUDING *PARVAN*S OF THE *VAIYĀSIKA-MAHĀBHĀRATA*** | RATNA BASU | : | 22-36 |
| 4. | **MONARCHY AND DEMOCRACY IN ANCIENT INDIAN TEXTS** | SARBANI GANGULI | : | 37-48 |
| 5. | **SAMUDRA-SAṄGAMA OR THE SANSKRIT RENDITION OF MAJMA '-UL- BAḤRIAN BY DARA SHUKOH: MINGLING OF SUFISM AND VEDANTIC HINDUISM IN EARLY MODERN INDIA** | GARGI BHATTACHARYA | : | 49-64 |
| 6. | **THEORY OF CREATION WITH REFERENCE TO NYĀYA-VAIŚEṢIKA SYSTEM** | CHINMAY MANDAL | : | 65-70 |
| 7. | **DHARMAŚĀSTRIC LAW AND ITS INTERPRETATIONS: A CLASH BETWEEN TEXT AND ITS DISCOURSE** | ANINDYA BANDYOPADHYAY | : | 71-78 |
| 8. | দুর্গাদাস লাহিড়ী : বঙ্গদেশের এক বিস্মৃতপ্রায় বেদব্যাখ্যাকার | দীধিতি বিশ্বাস | : | 79-83 |
| 9. | আধুনিক সমাজে ধর্মশাস্ত্রীয় বিবাহব্যবস্থার প্রাসঙ্গিকতা এবং সাংবিধানিক বৈধতা | স্বদেশরঞ্জন ঘোষাল | : | 84-93 |
| 10. | মনঃক্লেশ ও মুক্তির পথরেখা: - প্রসঙ্গ *শ্রীমদ্ভগবদ্গীতা* | দীপশ্রী মণ্ডল | : | 94-101 |

## SECTION B


| | | | | |
|---|---|---|---|---|
| 11. | वेदान्तस्य प्रस्थानद्वये ब्रह्मणः स्वरूपविषये *श्रीमद्भगवद्गीतायाः* प्रभावः | शिखा-सरकार-शिकदारः | : | 102-114 |
| 12. | श्री-जान्-म्यूर-प्रणीत-'मतपरीक्षा'-खण्डन-मण्डनम् | सौम्यजित्-सेनः | : | 115-132 |
| 13. | *तत्त्वचिन्तामणि*दिशा तर्कस्य संशयनिश्चयानुमानातिरिक्तत्वविचारः | सुव्रत-गायेनः | : | 133-137 |
| 14. | मीमांसा-वेदान्तनयोः अवयवविमर्शः | नाडुगोपाल-दासः | : | 138-152 |
| 15. | मथुरानाथदिशा *तत्त्वचिन्तामणेः* व्याप्त्यव्याप्तिलक्षणविमर्शः | रिया-पालः | : | 153-158 |
| 16. | **NATURE OF TIME AND TIME MEASUREMENT IN JAINISM** | BASUNDHARA GANGULY | : | 159-166 |
| 17. | ***ARIṢṬA*: COMMENTATORS' PROVISION AND MEDICAL SCIENCE'S PERSPECTIVE- DO THEY JUXTAPOSE?** | SWADHIN KUMAR MANDAL | : | 167-173 |
| 18. | শব্দ প্রমাণের প্রামাণ্য: ন্যায়-বৈশেষিকমত পর্যালোচনা | প্রসেনজিৎ বেরা | : | 174-180 |
| 19. | 'সিদ্ধে শব্দার্থসম্বন্ধে' বার্ত্তিকস্থ 'সিদ্ধে' পদের যুক্তি স্থাপনে কৈয়ট ও নাগেশের মতবিচার | প্রিয়াঙ্কা সাহা | : | 181-187 |
| 20. | শ্রীমদ্ মধ্বাচার্য্যকৃত দ্বৈতবাদ - একটি দার্শনিক পর্যালোচনা | সন্তু কাণ্ডার | : | 188-192 |


## SECTION C


| | | | | |
|---|---|---|---|---|
| 21. | अलङ्कारशास्त्रदिशा भक्तेः रसत्वारसत्वविमर्शः | प्रलय-नन्दी | : | 193-201 |
| 22. | ऊनविंशशतकीयभारतवर्षस्य ऐतिहासिकपरिसरे रचितं संस्कृतनाटकं 'प्रबुद्धहिमाचलम्' च : विश्लेषणात्मकमध्ययनम् | पूर्णिमा-हालदारः | : | 202-206 |
| 23. | काव्यानुशासन-साहित्यदर्पणग्रन्थयोः काव्यप्रयोजनविमर्शः | पुष्पेन्दु-मण्डलः | : | 207-210 |
| 24. | वैयाकरणानां मते तद्धितास्त्यर्थप्रत्ययानां | राहुल-दाँ | : | 211-220 |

| | | | | |
|---|---|---|---|---|
| | स्वरूपविश्लेषणम् | | | |
| 25. | वेदव्युत्पत्तिविमृष्टिः | सायन्ती-गराइः | : | 221-226 |
| 26. | उपदेशसाहस्रीदिशा तत्त्वमसि-महावाक्यविचारः | सोमनाथ-वर्मनः | : | 227-240 |
| 27. | संहितापदयोः प्रकृतिविकृतित्वविमर्शः | सुबीर-दलुइः | : | 241-244 |
| 28. | जिनशतक-ग्रन्थस्यालंकारदृष्ट्या पर्यालोचनम् | सुशान्त-व्यानार्जी | : | 245-255 |
| 29. | रमा-चौधुरी-प्रणीतस्य कालिदासीयमेघदूतानुक्तपूर्वपरवृत्ताश्रितस्य *मेघमेदुरमेदिनीयम्* इति नाटकस्य समीक्षणम् | तापस-वर्मनः | : | 256-262 |
| 30. | अद्वैतवेदान्तस्वारस्येन कणभक्षाक्षपादसम्मतकारणलक्षणे दोषप्रसञ्जनपुरःसरम् अद्वैताभिप्रायसमर्थनम् | राजेश-अधिकारी | : | 263-269 |
| 31. | आस्तिकदर्शनेषु गुणतत्त्वसमीक्षा | सुदीप-सर्दारः | : | 270-281 |
| 32. | **SOME CRITICAL OBSERVATIONS ABOUT APAROKṢĀNUBHŪTI** | SUDIP HALDER | : | 282-289 |
| 33. | **A BRIEF DISCUSSION ON BASIC MATHEMATICAL TECHNIQUES AND EASY SŪTRAS** | PRATIKA SANYAL | : | 290-296 |
| 34. | বর্তমান সমাজে সমাবর্তন সংস্কারের প্রাসঙ্গিকতা | ঐশী সাহা | : | 297-302 |
| 35. | বৌদ্ধনয়ে পঞ্চস্কন্ধসমষ্টি | মিঠুন নস্কর | : | 303-308 |
| 36. | *বীরভদ্রদেবচম্পূ*-কাব্যে পদ্মনাভ মিশ্রের রচনাশৈলী: একটি সমীক্ষা | মনিকা হাঁসদা | : | 309-315 |
| 37. | সৌত্রামণীযাগের প্রকৃতি-বিচার | মৌসুমী সাঁপুই | : | 316-319 |
| 38. | *শব্দশাস্ত্রে* হ্রস্ব অকারের সংবৃতত্ব ও বিবৃতত্ব বিচার | পল্লবী মালিক | : | 320-328 |
| 39. | *অথর্ববেদের* আলোকে পরিবেশ ও স্বাস্থ্য সচেতনতা | পিংকি খাতুন | : | 329-334 |
| 40. | *ছন্দঃকৌস্তুভ* গ্রন্থের ছন্দোগণিত: একটি সমীক্ষা | সেখ সামসুদ্দিন আলি | : | 335-347 |
| 41. | ন্যায়-বৈশেষিক দর্শনচর্চায় মহামহোপাধ্যায় কালীপদ তর্কাচার্যের অবদান | স্বাগত বিশ্বাস | : | 348-358 |
| 42. | মেঘদূত: নদী-নায়িকা প্রসঙ্গ | রাণু মণ্ডল | : | 359-365 |

| | | | |
|---|---|---|---|
| 43. ত্রিংশিকাভাষ্য অবলম্বনে যোগাচার বৌদ্ধসম্প্রদায় সম্মত উপচারের স্বরূপ বিচার | শুভব্রতা চক্রবর্তী | : | 366-374 |
| **CONTRIBUTORS** | | : | 375-377 |

# मीमांसा-वेदान्तनयोः अवयवविमर्शः

नाडुगोपाल-दासः


सारसंक्षेपः

मम शोधपत्रस्य विषयः 'मीमांसा-वेदान्तनयोः अवयवविमर्शः'। सर्वेषु दर्शनेषु अवयवशब्दस्य व्यवहारः परिदृश्यते। अवयवः कः? तस्य स्वरूपं किम्? इत्यादयः प्रश्नाः आदौ मनसि जायन्ते। अवयवशब्दः पुंलिङ्गान्तः। अव+√यु+ अप् = अवयव। अवयूयते कार्य्यद्रव्येन संबध्यते इति अवयवः। कार्यशब्देन अत्र अनित्यविषयाः बोध्यन्ते। अवयवः इत्यस्य समार्थकशब्दः अंशः। अवयवानां विमर्शः हि अवयवविमर्शः। विमर्शशब्दस्य समानार्थकः भावना वासना वा। जगतः सर्वे अनित्यविषयाः अंशे विभज्यमानाः। अतः सर्वे विषयाः अवयवेषु विभज्यमानाः। अवयवानां समुदायः अवयवी। अवयवी अवयवेषु वर्तते। जगतः सर्वे अनित्यविषययाः अत्र अवयवी। यथा घटः अवयवी। घटपरमाणु अत्र अवयवः। वैशेषिकाः मन्यन्ते अन्तिमः अवयवः परमाणुः। यतः परमाणोः विभागः नास्ति। अवयवी अवयवेषु विभक्तः। अस्मिन् जगति सर्वे कार्याणि अवयवेषु विभक्तानि। मनुष्यानां मनुष्येतरप्राणीनां उद्भिजानां च शरीरानि अवयवेषु विभक्तानि। मनुष्यानां मनुष्येतरप्राणीनां अवयवाः अङ्गानि इत्यभिधीयन्तो उद्भिजानां अवयवाः पुष्पादयः नामाभिधीयन्तो। अतः सर्वे कार्यद्रव्यानि अवयवेषु विभक्तानि। परन्तु अत्र अवयवशब्देन कार्यद्रव्यानां अवयवाः न बोध्यन्ते। अत्र अवयवशब्देन परार्थानुमानस्य अवयवाः बोध्यन्ते।

सर्वेषु एव आस्तिकदर्शनेषु अनुमानप्रमाणं स्वीकृतम्। तत्र अनुमानं द्विविधं यथा स्वार्थानुमानं परार्थानुमानं चेति। केवलं आस्तिकदर्शनेषु परार्थानुमानं न स्वीकृतम्। नास्तिकदर्शनेषु अपि परार्थानुमानं स्वीकृतम्। चार्वाकं विना बौद्धदर्शने जैनदर्शने च अनुमानप्रमाणस्य भेदः परार्थानुमानं स्वीकृतम्। परन्तु मम आलोच्यविषयः अत्र केवलं आस्तिकदर्शनेषु परार्थानुमाने स्वीकृताः अवयवाः। आस्तिकदर्शनं समानतन्त्रेषु विभक्तम्। तन्त्रशब्दस्यार्थः 'शास्त्रम्'। आस्तिकदर्शनानां मुख्यप्रयोजनं दुःख्यस्य चिरनिवृत्तिः अर्थात् मोक्षः। परन्तु मोक्षस्य उपायः भिन्नः वर्तते। सर्वे आस्तिकदार्शनिकाः मोक्षोपायः प्रदर्शयन्ति। भिन्नोपायेषु येषां दार्शनिकानां मतसाम्यं परिलक्षते ते समानतन्त्रदर्शनं इत्यभिधीयते। यथा १) सांख्यं योगश्च। २) वैशेषिकः न्यायः च। ३)मीमांसा वेदान्तश्चेति।

दर्शनचिन्तनपरम्परायाः कापि सीमा नास्ति। वैदिककालतः दर्शनचिन्तपरम्परा अधुनापि प्रचलति। 'मीमांसा-वेदान्तनयोः अवयवविमर्शः ' नाम शोधपत्ररचनायां विविधानि कारणानि सन्ति। मीमांसावेदान्तदर्शनयोः परार्थानुमाने अवयवाः स्वीकृताः न वा इति मम आदौ मनसि जिज्ञासा आसीत्। यदि अवयवाः स्वीकृताः तर्हि तेषां स्वरूपाणि प्रयोजनानि कानि समानतन्त्रदर्शनेषु वर्णितानि इति जिज्ञासा तत्परं आसीत्। मीमांसावेदान्तदर्शनयोः अवयवासंख्याविषये न्युनाधिक्यं यदि परिलक्ष्यते तत्कारणं किम् इति जिज्ञासा आसीत्? मीमांसावेदान्तदर्शनयोः अवयवसंख्या यदि भिन्नाः वर्तन्ते तर्हि कति अवयवाः अवश्यमेव आवश्यकं परार्थानुमानाय कथं वा आवश्यकं इति जिज्ञासा अपि आसीत्। इमा जिज्ञासा दुरीकरणाय अस्मिन् विषये मया शोधकार्यं कृतम्।

अस्मिन् शोधपत्रे मया मीमांसा-वेदान्तनयोः अवयवविमर्शः उपस्थाप्यते। वेदप्रामान्यमवलम्व्य स्वीकृतेषु आस्तिकदर्शनेषु अन्यतमौ वर्तेते मीमांसादर्शनं(पूर्वमीमांसा वा) वेदान्तदर्शनं(उत्तरमीमांसा वा) च इति। मीमांसादर्शने परार्थानुमानं स्वीकृतम्। यद्यपि मीमांसादर्शनं प्रमाणप्रधानशास्त्रं न। परन्तु प्रमाणं विना प्रमेयसिद्धिः न भवति। अतः प्रमाणम् आवश्यकम्। अत्र अनुमानप्रमाणस्य भेदद्वयं स्वीकृतम् यथा स्वार्थानुमानं परार्थानुमानं चेति। मानोमेयदयकारेण भणितं यत् "तच्चानुमानं स्वार्थपरार्थभेदेनापि द्विविधमाहुः"।[१] परार्थानुमाने प्रयुक्तानानां वाक्यानां प्रत्येकं अवयवः इति नामाभिधीयते। मीमांसकैः प्राचीननैयायिकवत् पञ्चावयववाक्यानि न स्वीकृतानि। तै मन्यन्ते अवयवः त्रिबिधः। यथा प्रतिज्ञा हेतुः उदाहरणञ्चेति। अथवा उदाहरणम् उपनयः निगमनञ्चेति। मीमांसकाः कथं अवयवः त्रिबिधः स्वीकृतवन्तः तत्कारणं अस्मिन् प्रबन्धे मया उल्लिखितम्।

मीमांसादर्शनस्य समानतन्त्ररूपेण वर्तते वेदान्तदर्शनम्। वेदान्तदर्शने मीमांसादर्शनमवलम्ब्य मतानि परिदृश्यन्ते। परन्तु मतानैक्यमपि परिदृश्यते। वेदान्तदर्शने अनुमानप्रमाणं द्विविधं यथा स्वार्थानुमानं परार्थानुमानम् चेति। वेदान्तपरिभाषायामुक्तं "तच्चानुमानं स्वार्था-परार्थ-भेदेन द्विविधम्"[२] येन अनुमानेन स्वकीयसन्दिग्धविषयस्य निश्चितज्ञानं भवति तत् स्वार्थानुमानम्। अत्र अवयववाक्यस्य प्रयोजनं नास्ति। परन्तु कुत्रापि यदि प्रतिवादी कमपि विषयमवलम्ब्य संशयः प्रकाशयति तर्हि तत्र वादी संशयदुरीकर्तुं अवयववाक्यानि प्रयोगः करोति तत् परार्थानुमानम्। परार्थानुमानेन परार्थानुमितिः जायते। परार्थानुमानं न्यायसाध्यम्। न्यायशब्देन अत्र अवयवसमुदायः बोध्यते। वैदान्तिकाः भणितं यत् ''परार्थं तु न्यायसाध्यम्। न्यायो नामावयवसमुदायः।''[३] वेदान्तमते त्रयः अवयवाः यथा प्रतिज्ञा हेतुः उदाहरणं चेति। अथवा उदाहरणं उपनयः निगमनञ्चेति। वेदान्तपरिभाषायामुक्तं ''अवयवाश्च त्रयः एव प्रतिज्ञाहेतुदाहरणरूपाः, उदाहरणोपनयनिगमनरूपा वा।''[४] अत्र वेदान्तदर्शनमवलम्ब्य अवयवानां संख्या स्वरूपानि प्रयोजनानि च मया उपस्थाप्यते। मीमांसावेदान्तदर्शनयोः परार्थानुमाने स्वीकृताः अवयवाः समानाः एव। परन्तु शास्त्रद्वयं प्रमाणप्रधानं न। वेदान्तदर्शने अवयवानां स्वरुपानि यथार्थरुपेण न प्राप्यन्ते। परन्तु अत्र अवयवानां प्रयोजनानि प्राप्यन्ते। प्रयोजनानि दृष्टा अस्मिन् प्रबन्धे वेदान्तदर्शनमवलम्ब्य अवयवानां स्वरुपाणि व्याख्यानं मया चेष्ट्यते। मीमांसावेदान्तदर्शनमवलम्ब्य अवयवविमर्शः एकस्मिन् अध्याये मया उल्लिखितम्। यतः ते समानतन्त्रदर्शनम्। अध्यायान्ते द्वयोः दर्शनशास्त्रयोः अवयवमवलम्ब्य तत्त्वानां किंचित् वैसादृश्यमपि यदि परिदृश्यते तदपि मया उल्लिखितम्।

दुःखनिवृत्तिप्रयोजनमवलम्ब्य दर्शनशास्त्रस्य सृष्टिः अभवत्। अतः जिज्ञासा जायते दर्शनं किम्? दर्शनशब्दस्य कोऽर्थः? इत्यादयः। दृश्- धातोः उत्तरं ल्युट्- प्रत्ययेन[५] दर्शनशब्दस्य सृष्टिर्भवति। पाणिनिना धातुपाठे दृश्- धातोः अर्थः कृतः 'दृशः प्रेक्षणे।' अर्थात् प्रेक्षणशब्दस्य अर्थः दर्शनम् ज्ञानं अनुधावनं वा। चक्षुरिन्द्रियादिसहायेन वाह्यविषयानां ज्ञानलाभः अत्र न अभिप्रेतः। भारतीयदर्शने दर्शनशब्दस्यार्थः भिन्नः। तत्र दर्शनमित्यस्यार्थः तत्त्वदर्शनम्, आत्मदर्शनम्, आत्मोपलब्धिर्वा। अर्थात् दर्शनेन तत्त्वज्ञानं भवति। तत्त्वं च "सतश्च सद्भावोऽसतश्चासद्भाव:"[६] येन तत्त्वपोलब्धिः भवति तत् दर्शनम्- ''दृश्यते साक्षात् क्रियते तत्त्वम् एभिरिति दर्शनानि।'' प्राचीनपण्डिताः उक्तवन्तः-

> यदाभ्युदयिकं चैवं नैश्रेयसिकमेव च।
> सुखं साधयितुं मार्गं दर्शयेत् तद् हि दर्शनम्॥

अर्थात् यत् शास्त्रं अभ्युदयागतसुखं निःश्रेयसलभ्यसुखं च उभययोः पथप्रदर्शकं तत् दर्शनम्। दर्शनशब्दस्य पारिभाषिकार्थः जगतः जीवनस्य च सम्यकोपलब्धिः ज्ञानं वा।

भारतीयदर्शनम् आस्तिकनास्तिकभेदेन द्विविधम्।[७] आस्तिकाः वेदस्य प्रामाण्यं स्वीकुर्वन्ति, नास्तिकाः तु वेदनिन्दकाः[८]इति। आस्तिकश्रेण्याम् अस्ति न्यायः वैशेषिकः सांख्यः योगः मीमांसा वेदान्तश्च। नास्तिकश्रेण्याम् अस्ति चार्वाकः जैनः बौद्धश्च। तेषु भारतीयदर्शनेषु चार्वाकदर्शनमृते सर्वाणि भारतीयदर्शनानि परमपुरुषार्थरूपेण मोक्षं स्वीकुर्वन्ति। मोक्षशब्देन दुःखस्य चिरनिवृत्तिः बोध्यते। मोक्षो हि सर्वेषां जनानां परमपुरुषार्थः। दर्शनशास्त्रं मोक्षलाभस्य उपायं ज्ञापयति इत्यनेन तच्छास्त्रं मोक्षशास्त्रनाम्ना अपि अभिधीयते। अयं मोक्षः तत्त्वज्ञानात् जायते। तत्त्वज्ञानलाभार्थं शास्त्राध्ययनं कर्तव्यम्। तथाहि उक्तम्-

> श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।

मत्वा च सततं ध्येय एते दर्शनहेतवः॥[९] इति।

तथाहि महर्षिणा कणादेन अपि तदीये वैशेषिकसूत्रग्रन्थे भणितम्-"यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः"[१०] इति।

समानतन्त्रदर्शनेषु अन्यतमौ मीमांसादर्शनं वेदान्तदर्शनञ्चेति। आस्तिकदर्शनशास्त्रेषु मीमांसादर्शनं विशिष्टरूपेण विराजते। मीमांसादर्शनं द्विविधं- पूर्वमीमांसा उत्तरमीमांसा च। पूर्वमीमांसाशब्देन केवलं मीमांसादर्शनं बोध्यते। उत्तरमीमांसाशब्देन वेदान्तदर्शनं बोध्यते। वेदस्य कर्मकाण्डस्योपरि निर्भरं कृत्वा सृष्टदर्शनं पूर्वमीमांसादर्शनं मीमांसादर्शनं वा। वेदस्य ज्ञानकाण्डस्योपरि निर्भरं कृत्वा सृष्टदर्शनं उत्तरमीमांसादर्शनं वेदान्तदर्शनं वा। द्वयोः दर्शनयोः अवयवविमर्षः अत्र मया उपस्थाप्यते। आदौ मया मीमांसानये अवयवविमर्षः उपस्थाप्यते। तत्परं वेदान्तनये अवयवविमर्षः उपस्थाप्यते। अन्तिमे द्वयोः दर्शनयोः अस्मिन् विषये यदि वैसादृश्यं परिलक्ष्यते तदपि मया उपस्थाप्यते।

**मीमांसानये अवयवविमर्शः ।**

मानवजीवनस्य पुरुषार्थः चतुर्विधः। यथा धर्मः अर्थः कामः मोक्षश्चेति। अत्र आदौ विद्यते धर्मः। यतः धर्मस्योपरि जीवनं प्रतिष्ठितः भवति। धर्मः अत्र आधारः। महाभारतस्य शान्तिपर्वण्यपि उक्तम्- "धारणाद्धर्मः इत्याहुः"। मीमांसाशास्त्रस्य मुख्यप्रयोजनमपि धर्मप्रतिपादनम्। कुमारिलभट्टेन अपि भणितं यत् "धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम् ।"[११]

पूजार्थकात् तथा विचारार्थकात् मान्-धातोः सन्-प्रत्यये कृते सति 'मीमांसा' इति शब्दः निष्पद्यते। कुमारिलभट्टेन भणितं यत्-"मीमांसाशब्दः पूजितविचारार्थे प्रसिद्धः...।"[१२] व्युत्पत्त्यनुसारेण अस्यार्थः 'पूजायाः इच्छा' तथा 'विचारविषये इच्छा' वा। भिन्नरूपेण अस्यार्थः जिज्ञासा विचारः वा मन्यते। मीमांसासूत्रकारेण जैमिनिना अपि उक्तम्- "अथातो धर्मजिज्ञासा"।[१३] मीमांसाशास्त्रस्य अपरं नाम 'पूर्वमीमांसा' 'कर्ममीमांसा' च। वेदस्य पूर्वभागं ब्राह्मणम्। ब्राह्मणग्रन्थैः सह सम्बन्धेन दर्शनमिदं पूर्वमीमांसा इति रूपेण आख्यायते। ब्राह्मणग्रन्थेषु प्रतिपादितानि कर्मकाण्डानि तथा यज्ञादिनि अस्मिन् शास्त्रेषु विचारः भवति। अनेन कारणेण मीमांसादर्शनं कर्ममीमांसा इति रूपेण आख्यायते। मीमांसादर्शनं ब्राह्मणग्रन्थानां वाक्यानां अर्थनिर्णयार्थं वैज्ञानिकपद्धतिं स्थापयति। यदधीकृत्य ब्राह्मणग्रन्थानां वाक्यानां विचारः भवति। अतः मीमांसादर्शनं वाक्यार्थविज्ञानम् इत्यभिधीयते।

मीमांसादर्शनस्य सर्वप्रथमः सुव्यवस्थितः ग्रन्थः 'मीमांसासूत्रम्'। मीमांसासूत्रस्य रचयिता महर्षिः जैमिनिः। अतः मीमांसासूत्रं 'जैमिनिसूत्रम् ' इत्यपि अभिधीयते। मीमांसासूत्रस्योपरि शवरस्वामिकृतं 'शावरभाष्यं' प्राप्यते। तत्परं कोऽपि महान् मीमांसादार्शनिकः न प्राप्यते। खी. सप्तमशतके पुनः मीमांसादर्शनस्य द्वौ पण्डितौ जातः कुमारिलभट्टः प्रभाकरमिश्रः श्चेति। कुमारिलभट्टतः भाट्टसम्प्रदायः प्रभाकरमिश्रतः प्राभाकरसम्प्रदायः सृष्टः अभवत्। मुरारिमिश्रः इति नाम्ना एकः मीमांसादार्शनिकः जातः। मुरारिमिश्रतः मुरारिसम्प्रदायः जातः। अतः मीमांसादर्शनस्य त्रयः सम्प्रदायाः अधुना प्राप्यन्ते। यथा-क,भाट्टसम्प्रदायः।ख.प्राभाकरसम्प्रदायः।ग.मुरारिसम्प्रदायः।

मीमांसादर्शने प्रधानरूपेण वेदवाक्यस्य विचारः प्राप्यते। तत्सह प्राप्यते वेदः पौरुषेयः अपौरुषेयः वा इत्यस्य विचारः। आत्मनः नित्यानित्यविषये विचारः,यागादि विषये विवेचनम् इत्यादि अपि अत्र प्राप्यते। पदार्थानां यथार्थज्ञानं प्रमाणात् भवति। मीमांसासूत्रे प्रमाणस्य विचारः यथार्थरूपेण न प्राप्यते। परन्तु भाट्टसम्प्रदायमवलम्ब्य

'मानमेयोदयः' इत्याख्यो ग्रन्थः प्राप्यते। 'मानमेयोदयः' भाट्टसम्प्रदायस्य प्रकरणग्रन्थः। अत्र यागस्य वर्णना न प्राप्यते। भाट्टसम्प्रदायमवलम्ब्य प्रमाणानां प्रमेयानां च विवचनं मानमेयोदये पाप्यते। मानमेयोदयग्रन्थस्य रचयितारौ नारायणभट्टः नारायणपण्डितः च। नारायणभट्टेन प्रत्यक्षादिप्रमाणानि आलोचितानि। नारायणपण्डितेन द्रव्यादि-प्रमेयानि आलोचितानि। ग्रन्थस्य आदौ प्रमाणलक्षणम् आलोचितम्। नारायणभट्टेण उक्तम्-

प्रमाकरणमेवात्र प्रमाणं तर्कपक्षवत्।
प्रमा चाज्ञाततत्त्वार्थज्ञानमेवात्र भिद्यते॥[१४]

न्यायदर्शनवत् अत्र प्रमाणलक्षणम् उक्तम्- 'प्रमाकरणं प्रमाणम्'। अर्थात् प्रमायाः करणं प्रमाणम्। परन्तु प्रमा इति विषये भिन्नमतं परिलक्ष्यते। न्यायनये यथार्थानुभवः हि प्रमा। केशवमिश्रेण भणितं यत् ''यथार्थानुभवः प्रमा''। परन्तु अत्र अज्ञातः तत्त्वस्य यथार्थज्ञानं हि प्रमा। न्यायदर्शने यथार्थानुभवस्य अर्थात् तत्त्वज्ञानस्य उल्लेखः प्राप्यते परन्तु 'अज्ञात' इति पदस्य प्रयोगः न प्राप्यते। भाट्टमते प्रमालक्षणे 'अज्ञात' इति पदस्य प्रयोगः प्राप्यते। 'अज्ञात' इति पदेन 'स्मृतिः', 'अनुवादः' च इत्यत्र प्रमालक्षणं निराकरोति। यतः 'स्मृतिः' पूर्वज्ञातविषयस्मरणम्। प्रमेयज्ञानं प्रमाणतः भवति। प्रमाणं प्रमायाः करणं भवति। वाक्यस्य पूर्वकथनेन यत् ज्ञानं जायते तत्परं अनुवादेन(पुनः वचनेन) पूर्वज्ञातज्ञानम् उत्पद्यते। अत्र कापि विशेषणता नास्ति। अतः 'अनुवादः' अज्ञातविषयस्य ज्ञानं न। 'अनुभवः' इति पदेन नैयायिकाः स्मृतेः प्रमात्वं निराकरोति। परन्तु अनुवादे प्रमात्वं नैयायिकाः न निराकुर्वन्ति। अतः न्यायमते 'अनुवादः' प्रमा भवति। परन्तु भाट्टमतानुसारेण 'अनुवादः' प्रमा न। नारायणभट्टेण उक्तम् ''अज्ञातपदेनात्र ज्ञातविषयो स्मृत्यनुवादयोर्निरासः''।[१५] तत्त्वपदेन भ्रमादीनां निरासः भवति। नारायणभट्टेण उक्तम्-''तत्त्वपदेन भ्रमसंशयादीनामयथार्थज्ञानानां निरासः''।[१६] भाट्टमतानुसारेण षट् प्रमाणानि। यथा प्रत्यक्षम् अनुमानम् उपमानं शब्दः अर्थापत्तिः अभावश्चेति। नारायणभट्टेन उक्तम्-

प्रत्यक्षमनुमानं शब्दं चोपमितिस्तथा।
अर्थापत्तिरभावश्च षट् प्रमाणानि मादृशाम्॥[१७]

प्रत्यक्षलक्षणं मीमांसकाः कृतवन्तः ''तत्र इन्द्रियसन्निकर्षजं प्रमाणं प्रत्यक्षम्''।[१८] अर्थात् प्रमाणेषु इन्द्रियसन्निकर्षजन्यं यत् प्रमाणं तत् प्रत्यक्षम्। चक्षुः कर्णः नासिका जिह्वा त्वक् मनश्च अत्र इन्द्रियाणि। मानोमेयोदयकारेण भणितं यत्- ''चक्षूरसनघ्राणस्पर्शनश्रोत्राणि मनश्चेति षडिन्द्रियाणि''।[१९] प्रत्यक्षलक्षणात् अनन्तरम् मीमासकाः अनुमानलक्षणं कृतवन्तः-''व्याप्यदर्शनादसन्निकृष्टार्थज्ञानमनुमानम्''।[२०] व्याप्यम् अर्थात् व्याप्तिविशिष्टपदार्थस्य ज्ञानात् इन्द्रियेण सह असम्वन्धपदार्थस्य यत् ज्ञानं तत् अनुमानप्रमाणम्। भाववाच्ये निष्पन्नं 'अनुमानम्' इति शब्देन अनुमितिरूपेण ज्ञानं बोध्यते। अत्र उदाहरणं उल्लिखितम्-''यथा पर्वते धूमवत्त्वदर्शनादग्निमत्त्वज्ञानम्''। अर्थात् पर्वते धूमवत्त्वज्ञानेन अग्निमत्त्वज्ञानं अनुमानम्। पर्वते केवलं धूमदर्शनेन अग्नेः ज्ञानं न भवति। व्याप्तिविशिष्टधूमदर्शनेन अग्नेः ज्ञानं भवति। अतः 'धूमवत्त्वदर्शनात्' इत्यनेन 'पर्वते व्याप्यत्वेन धूमवत्त्वदर्शनात्' इति अर्थः प्रकाश्यते। अर्थात् वह्निव्याप्यं यत् धूमं, तत् धूमं पर्वते विद्यते इति ज्ञानेन 'पर्वतो अग्निमान्' इति ज्ञानम् उत्पद्यते। व्याप्तिः का? इति प्रश्नस्य उत्तरं मीमांसकाः प्रदीयन्ते ''स्वाभाविकः सम्बन्धो व्याप्तिः, स्वाभाविकत्वम् उपाधिराहितत्त्वम्''।[२१] अर्थात् स्वाभाविकसम्वन्धं व्याप्तिः। स्वाभाविकः सम्वन्धः व्याप्तेः स्वरूपं, लक्षणं न। लक्षणं तु न्यायवत्। अतः मीमांसकाः व्याप्तेः लक्षणं न प्रदीयन्ते। मीमांसकाः अनुमानस्य विभागत्रयं स्वीकृतवन्तः। यथा अन्वयव्यातिरेकि, केवलान्वयि, केवलव्यातिरेकि च इति। मानोमेयदयकारेण भणितं